पोय्गै आळ्वार (सरोयोगिन्) ने श्रीमन्नारायण की स्तुति करने के लिए जो आधार बनाया वह भी अपूर्व एवं विशाल है। 'जिन सुदर्शन चक्रधारी पेरूमाळ् का यह भूलोक दीपाधार है, यह सागर घृत है, सूर्य प्रकाशयुक्त वर्तिका है उनके चरणों में यह पद्य- माला संसार को कष्ट-सागर से मुक्त करने के लिए अर्पित करता हूं।[3] भगवान के नाम उच्चारण करने के लिए मुंह के अन्दर ही जिह्वा है जिसे अन्यत्र खोजने की आवश्यकता नहीं है। जपने के लिए मधुर 'नमो नारायणाय, शब्द है। आश्चर्य है कि लोग अपने पास के साधन को न अपना कर भगवान् को प्राप्त करना छोड़ कर दिशा भ्रमित मार्ग पर क्यों चलते हैं।[4] न तो उसका कोई निश्चित रूप हैं,न निश्चित आकार है और न ही निश्चित नाम है,भक्त (अडियार) उसे जिस नाम से पुकारते हैं वह तो उसी नाम को स्वीकार कर लेता है।[5]

इन पदों का विश्लेषण करने पर स्पष्ट हो जाता है कि वर्तिका-युक्त सूर्य का प्रकाश यदि बाह्य जगत में है तो हृदयरूपी वर्तिका को भी प्रकाशित करने का उपक्रम है। प्रभु की वन्दना का लक्ष्य सांसारिक कष्टों से मुक्ति की कामना तो है पर अपनी मुक्ति की नहीं, प्रभु जिस रूप में चाहो स्मरण ध्यान का विषय बन सकते हैं पर पोय्गै ने नारायण का ही रूप प्रमुख रूप से काव्य का विषय बनाया है। वास्तव में यह साधक कवि परमब्रह्म पुरूषोत्तम को अणु से भी अणु और महान से भी महान से भी सर्वव्यापी रूप में -

अणोरणीयान् महतो महीयानात्मा गुहायां निहितोऽस्य जन्तोः।
तमक्रतुं पश्यति वीतशोको धातुःप्रसादान्महिमानमीशम्॥[6]

---

[1] कुमार सेठ डॉ. रवीन्द्र 1931 तमिल वैष्णव कवि आळवार (पृ. 1) साहित्य शोध संस्थान,उत्तर प्रदेश संस्कृत अकादमी, लखनऊ

[2] उपाध्याय आचार्य बलदेव, 1978 वैष्णव सम्प्रदायों का साहित्य और सिद्धान्त (पृ. 148) चौखाम्बा अमरभारती प्रकाशन, वाराणसी

[3] कुमार सेठ डॉ. रवीन्द्र, 1931 तमिल वैष्णव कवि आळवार, पृ. 41 (मुदल तिरुवन्तादि, पद -1) साहित्य शोध संस्थान,उत्तर प्रदेश संस्कृत अकादमी, लखनऊ

[4] कुमार सेठ डॉ. रवीन्द्र, 1931 तमिल वैष्णव कवि आळवार, पृ. 41 (मुदल तिरुवन्तादि, पद -44) साहित्य शोध संस्थान,उत्तर प्रदेश संस्कृत अकादमी, लखनऊ

[5] कुमार सेठडॉ.रवीन्द्र 1931 तमिल वैष्णव कवि आळवार, पृ. 41 (मुदल तिरुवन्तादि, पद -95) साहित्य शोध संस्थान,उत्तर प्रदेश संस्कृत अकादमी, लखनऊ

[6] श्वेताश्वतरोपनिषद, 3/20

आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदाति तथैव चान्यः।
आश्चर्यवच्चैनमन्य श्रृणोति श्रुत्वाप्येनं वेद न चैव कश्चित्॥[1]

अर्थात् कोई एक महापुरुष ही इस आत्मा को आश्चर्य की भाँति देखता है और वैसे ही दूसरा कोई महापुरुष ही इसके तत्त्व का आश्चर्य की भांति वर्णन करता है तथा दूसरा कोई अधिकारी पुरुष ही इसे आश्चर्य की भांति सुनता है और कोई कोई तो सुनकर भी उसको नहीं जानता है। भूतत्तु आऴ्वार (भूतयोगिन्) बाल्यावस्था से ही सन्त, पवित्र, निष्कलङ्क ज्ञान के अपूर्व भण्डार और श्रेष्ठ भगवत् अनुरागी थे इन्होंने भगवान की भक्ति करते हुए कहा है कि भक्ति रूपी दीपक,कामना रूपी घृत, प्रभु- चिन्तन रूपी वर्तिका को ज्ञान के प्रकाश द्वारा आलोकित कर मैं तमिल पद्य रचना को नारायण के चरणों में अर्पित करता हूँ।[2] भगवान श्रीकृष्ण (नारायण) के प्रति सन्त अपनी भक्तभाव को(वात्सल्य भाव से)के प्रति भक्ति से एक पद्य स्पष्ट करते हुई कहा हैं कि बहुत प्रेम से दूध पिलाने के लिए पुतना ने तुम्हें गोदी में लिया और तुमने स्तन का पान करते हुए उसकी जीवन-लीला ही समाप्त कर दी! यशोदा ने यह सब देखकर भी भय रहित प्रभु तुम्हें दूध पिलाया, माता की अभूतपूर्व दया ममता के लिए यह धरती भी प्रत्युकार में दी जाए तो भी पर्याप्त नहीं होगी।[3] एक ही पद में तीन अवतारों का वर्णन करते हुए भुतत्तु कहते हैं- वामन रूप में सम्पूर्ण लोक के लिए, नृसिंह रूप में तीक्ष्ण नखों द्वारा हिरण्यकशिपु का संहार किया और (कृष्णावतार रूप में) सात लोकों को प्राप्त किया।[4]

महाविष्णु गजेन्द्र-मोक्ष शकटासुर भञ्जन, राम, वामन, नृसिंह आदि का अनेक बार उल्लेख इनकी कृति 'इरन्डाम् तिरुवन्तादि'मे उपलब्ध है। पेय् आऴ्वार (महायोगिन्) वैष्णव भक्ति की श्री सम्प्रदाय के मतानुयायी इन्हें भी पोय्गै और भूतत्तु की भांति भगवद्भक्ति के प्रचार प्रसार के लिए भेजे गए अंशावतार माने जाते हैं। मन्दिर के कुएं के रक्त कमल से इनकी उत्पत्ति हुई है। ऐसा माना जाता है। प्रभु साक्षात्कार का उल्लेख करते हुए सन्त ने प्रथम पद्य में ही कहा है - मैंने उनके कृष्ण-रूप में स्वर्णित लक्ष्मी के दर्शन किए! मुझे महाविष्णु के कृष्ण का भी दर्शन हुआ,मैं ने उनके हाथों में सुन्दर पांचजन्य एवं युद्ध के लिए सुदर्शन चक्र के दर्शन प्राप्त किए।[5] प्रभु निश्चय ही रस-रूप है, भक्त महालक्ष्मी के स्वर्णिम एवं विष्णु के चमकते कृष्ण वर्ण को देखकर आनन्द-मग्न हो जाते हैं। महायोगिन् आस्था श्रद्धा और भक्ति के कवि हैं, आत्मतत्त्व में अटूट आस्था, श्रद्धा-विश्वास आधृत भक्ति-से युक्त विवेकशील ज्ञानी साधक भक्त के रूप में पेय्आलवार अपने ज्योतिर्मय प्रभु के लिए सतत प्रयत्नशील हैं। इनकी धार्मिक सहिष्णुता शिव और विष्णु ऐक्य-दृष्टि

---

[1] श्रीमद्भगवद्गीता, 2/29

[2] सन्तवाणी-नालायिर दिव्यप्रबन्ध,तमिल भाषा के वैष्णव आळवार सन्तों का चतुस्सहस्त्र आळवार दिव्यप्रबन्ध,साहित्य प्रस्तुत कर्ता डॉ. पी. जयरामन (खण्ड-1) प्रथम संस्करण वाणी प्रकाशन पद्य-1

[3] तत्रैव पद्य - 5

[4] तत्रैव पद्य-18

[5] कुमार सेठ डॉ. रवीन्द्र, 1931 तमिल वैष्णव कवि आळवार (पृष्ठ 55) साहित्य शोध संस्थान,उत्तर प्रदेश संस्कृत अकादमी, लखनऊ।

सर्वाधिक महत्त्वपूर्ण है। विष्णु भगवान् के प्रति गम्भीर, श्रद्धा संवलित प्रेम उनके काव्य का मूल विषय है। इनके काव्य के प्रथम पद्य में देवी महालक्ष्मी एवं विष्णु का सामञ्जस्य श्रीवैष्णव सिद्धान्त की आधारशिला है।[1]

नम्माळ्वार(शठकोप) द्वारा भगवान विष्णु की भक्ति में 1296 पद नालायिर दिव्यप्रबन्ध में प्राप्त होते हैं। इस रचना को भगवद्विषयक ईश्वरीय गुणों की व्याख्या तथा गायन करने वाला माना गया है। उस अथाह आनन्द सागर, अनन्त प्रभु के साथ यह प्रत्यक्ष सम्बन्ध है, इस अखिल ब्रह्माण्ड में जो कुछ भी चराचरात्मक जगत् है सब का सर्वाधार, सर्वनियन्ता, सर्वशक्तिमान्, सर्वज्ञ सर्वकल्याण गुण स्वरूप परमेश्वर से व्याप्त है। जो समस्त प्राणियों में परमात्मा को देखता है - 'सर्वभूतेषु चात्मनं तथा सर्वं खल्विदं ब्रह्म' का भाव तिरुवाय्मोलि का अन्तर्निहित विषय है। मनुष्यों का ध्यान सांसारिकता से हटाकर चरम सत्य की ओर उन्मुख करना यही इनका मूल लक्ष्य द्रष्टव्य होता है! "जब मानव स्वयं को प्रभु के प्रति अर्पित कर देता है तो सब सहज, सरल हो जाता है, ईश्वर स्वयं को भक्त के प्रति तभी अर्पित करता है जब भक्त पूर्णरूपेण उसे अपना सर्वस्व दे देता है।"[2] कुलशेखर-आळ्वार भगवत भक्ति में दो ही रचनाएं प्राप्त हैं - मुकुन्दमाला तथा पेरुमालतिरुमोलि। संस्कृत में रचित 'मुकुन्दमाला' वैष्णव भक्ति की अप्रतिम रचना के रूप में विख्यात है -

जयतु जयतु देवो देवकीन्दनोऽयं जयतु जयतु कृष्णो वृष्णिवंशप्रदीपः।
जयतु जयतु मेघश्यामलः कोमलाङ्गः जयतु जयतु पृथ्वीभारनाशो मुकुन्दः॥[3]

कवि का प्रबल आग्रह है कि विष्णु के प्रति एकनिष्ठ भक्ति ही मनुष्य का उद्धार कर सकती है। इसलिए इस भवसागर से पार उतरने के लिए, जो तृष्णारूपी जल से आपूरित है, मोहरूपी तरङ्गों से व्याप्त है, स्त्रीरूपी आवर्त से युक्त है तथा पुत्ररूपी ग्राहसमूह से संकुलित है, केवल भक्तिरूपी नाव प्रदान करने की याचना कवि करता है। भाषा की मधुरता तथा भावों की कोमलता में यह मुकुन्दमाला स्तोत्र अद्वितीय माना गया है-

कृष्णो रक्षतु नो जगत्त्रयगुरुः कृष्णं नमध्वं सदा,
कृष्णेनाखिलत्रवो विनिहताः कृष्णाय तस्मै नमः।
कृष्णादेव समुत्थितं जगदिदं कृष्णस्य दासोऽस्म्यहम्,
कृष्णे तिष्ठति विश्वमेतदखिलं हे कृष्ण! रक्षस्व माम्॥[4]

वास्तव में कुलशेखर जी का भगवान विष्णु के प्रति अनन्य भक्ति थी, सभी आळ्वार सन्तों में उन्होंने भगवान विष्णु की भक्ति में प्रथम स्थान प्राप्त किया इन्होंने श्रीमन्नारायण से प्रार्थना करते हुए कहा है कि ' हे प्रभु मेरी मात्र यही कामना है कि मैं तुम्हारे मन्दिर की एक सीढ़ी बनकर रहूं जिससे भक्तों के चरण बार-बार मेरे मस्तक पर पड़े। पूर्णतया

---

[1] कुमार सेठ डॉ.रवीन्द्र,1931तमिल वैष्णव कवि आळवार (पृष्ठ 58) साहित्य शोध संस्थान,उत्तर प्रदेश संस्कृत अकादमी, लखनऊ

[2] तत्रैव पृ. 79

[3] श्री मुकुन्दमाला स्तोत्र, कुलशेखर, श्लोक - 2

[4] श्री मुकुन्दमाला स्तोत्र, कुलशेखर, श्लोक - 44

परिचित कुलशेखर आळ्वार भक्ति मार्ग के सच्चे पथिक हैं। इन्होंने भगवान विष्णु का रङ्गनाथ, राम तथा कृष्ण आदि रूपों में गुणगान किया है। पेरिवाळ्वार(विष्णुचित्त) भगवान विष्णु की स्तुति करते हुए कहते हैं कि नारायण शब्द कहने के अतिरिक्त साधुता या असाधुता कुछ नहीं जानता श्रीमन्नारायण! क्षुद्र स्वभाव के कारण असत्य वचन कहकर तुम्हारी स्तुति करने वाला तो मैं नहीं हूं। तुम्हारे ध्यान करने की विधि मैं नहीं जानता, निरन्तर नमो नारायण कहता ही रहता हूं, भक्तों को न तो वस्त्र और न ही अन्न की कामना है।[1]

आण्डाळ(गोदा) बाल्यावस्था में ही श्रीरङ्गम् के रङ्गनाथ जी को पतिरूप में धारण कर लिया। वह श्री रङ्गनाथ को अर्पित करने से पूर्व गुंथी हुई माला को अपने गले में पहनकर प्रभु के लिए भेजती थी। एक दिन पिता पेरिवाळ्वार द्वारा यह देख लिए जाने के कारण गले से उतरी हुई माला रङ्गनाथ जी को अर्पित नहीं की गई। उसी रात्रि में पेरिवाळ्वार को स्वप्न में श्रीरङ्गनाथ का आदेश हुआ कि उन्हें आण्डाळ द्वारा धारण की गई माला ही अर्पित की जाए। आण्डाळ का अर्थ-जिसने भगवान को प्राप्त किया अथवा भगवान् के प्रति प्रबल प्रेम करने वाली " इन्हें दक्षिण भारत की मीरा कहा जाता है।"[2] तोंडरअडिप्पोडिआळ्वार(भक्तान्घ्रिरेणु, विप्रनारायण) भगवान् की स्तुति करते हए कहते हैं - न तो मैं तपस्वियों के परिवार से सम्बद्ध हूँ, न धनाढ्य वर्ग से! न ही मेरे सम्बन्धियों का मुझसे कोई वास्ता है। सुन्दरियों के अरुण-अधरों के पाश द्वारा आबद्ध मैं ने अपना जीवन वृथा कर दिया है। श्रीरङ्गम् के स्वामी मुझे तो आपने, जीवन व्यर्थ ही दिया! कवि अपने मनसा-वाचा-कर्मणा जड़ता का उल्लेख करता है तथा प्रभु से विमुख होने के दोष इत्यादि का वर्णन करने के उपरान्त प्रभु की ही शरण ग्रहण करता है - मूर्खनेन् वन्दु निन्रेन, मूर्खनेन्, मूर्खनेन।[3]

जब मैं द्यूत क्रीडा में संलग्न एवं चोर था तथा स्त्री के मीन-सदृश नेत्रों के जाल में फंस कर असहाय हो गया था, तब श्रीरङ्गनाथ के अपार सौन्दर्य ने ही तो मुझे पुकारा मेरी बुद्धि को सन्मार्ग की ओर उन्मुख कर अपने प्रति मुझे प्रेम की बुद्धि प्रदान की। तिरुप्पाण्आळ्वार (मनिवाहन) स्तुति गान करते हुए कहा कि मुझे दासों(अडियार) का दास बनाने वाले स्वर्ग लोक के वासियों के अधीश्वर सुगन्धित उपवनों से युक्त वेंकटगिरि के स्वामी भक्तों के दोष न देखने वाले श्रीरङ्ग के स्वामी के श्रीकमल चरण मेरे नेत्रों में विद्यमान हैं।[4] स्तुति करते हुए कवि ने प्रभु के चरण कमल पीताम्बर नाभि, मेखला, श्रीवक्ष, कण्ठ,अरुण अधर अवसादरहित लोचन, नीलवर्णशरीर को अपना विषय बनाया। वक्षस्थल के उल्लेख में लक्ष्मी का विशेष आदर सहित वर्णन प्राप्त हुआ है।

तिरुमङ्गै आळ्वार(परकाल,नीलन) भक्ति के मार्ग को पूर्ण रूप से आत्मसात करने वाले तिरुमङ्गै आळ्वार ने कतिपय सरल सिद्धान्तों का प्रतिपादन किया है। निराहार रहना, पॉच इन्द्रियों को पीडा देना, शरीर को कृश करने का

---

[1] कुमार सेठ डॉ. रवीन्द्र 1931 तमिल वैष्णव कवि आळवार (पृ. 117) साहित्य शोध संस्थान, उत्तर प्रदेश संस्कृत अकादमी, लखनऊ (पेरिवाळवार तिरुमोलि - 1/6)

[2] तत्रैव पृ. 131

[3] तत्रैव पृ. 152

[4] तत्रैव पृ. 160

प्रयास आदि वृथा है। दीर्घकाल तक कच्चे फल खाकर तीव्र वायु का पान करना तथा चिरकाल तक पांच अग्नियों के मध्य खड़े होकर तपस्या करने की भी कोई आवश्यकता नहीं, भक्ति के मार्ग का पथिक तो प्रभु की शरण मात्र ग्रहण कर ले, यही पर्याप्त है।[1] रामानुज के पूर्ववर्ती सभी दिव्यसूरि तथा आचार्यगण एकेश्वरवादी थे, वे नारायण या विष्णु को भगवान मानते थे। विष्णु ही सृष्टि के कर्ता धर्ता तथा हर्ता हैं। प्रभु की तीन शक्तियॉ हैं- श्री(लक्ष्मी),भू तथा लीला। नारायण के छः गुण हैं - ऐश्वर्य, तेज, शक्ति, बल, वीर्य तथा विज्ञान। विज्ञान भगवान का स्वरूप है। रामानुज सम्प्रदाय की गुरु परम्परा के सभी आचार्य गुरु श्रीरङ्ग के उपासक थे। उनके इष्टदेव श्रीरङ्गम् मन्दिर में प्रतिष्ठित श्रीरङ्गनाथ की मूर्ति थे, नाथमुनि के साथ ही वहॉ आऴ्वारों के दिव्य-प्रबन्ध का गायन होता चला आ रहा है।[2]

इस प्रकार वैष्णव सम्प्रदाय में भगवान विष्णु की भक्ति को ही सर्वोपरि माना गया है, भक्ति तत्त्व से ही भक्ति रस का भी प्रतिपादन किया गया है। वास्तव में भक्ति रस ही मुख्य रूप से भक्ति तत्त्व है।

सहायकग्रन्थसूची

1. कुमार सेठ डॉ.रवीन्द्र, 1931, तमिल वैष्णव कवि आळवार, साहित्यशोध संस्थान उत्तर प्रदेश संस्कृत अकादमी, लखनऊ।
2. उपाध्याय श्रीबलदेव आचार्य, 1978, वैष्णव सम्प्रदायों का साहित्य और सिद्धान, चौखम्बा अमरभारती प्रकाशन,वाराणसी।
3. सरस्वती श्रीमधुसूदन, 2015, श्री भगवद्भक्ति रसायन, (अनुवाद - पाण्डेय शास्त्री श्री जनार्दन) चौखम्बा विद्याभवन, वाराणसी।
4. स्व.पद्मभूषण उपाध्याय श्री बलदेव आचार्य, 2018, संस्कृत वाङ्मय का बृहद् इतिहास (दशम-खण्ड वेदान्त),उत्तर प्रदेश संस्कृत संस्थान, लखनऊ।
5. गोयन्दका जयदयाल, 2020, श्रीमद्भागवद्गीता(तत्वविवेचनी हिन्दी-टीका),गीताप्रेस गोरखपुर।
6. सरस्वती श्री हरिहरान्द(महाराज श्री करपात्री), 2016, श्री राधाकृष्ण धानुका प्रकाशन संस्थान।
7. पद्मश्री द्विवेदी आचार्य डॉ. कपिलदेव, 2015, वैदिक साहित्य एवं संस्कृति, विश्वविद्यालय प्रकाशन, वाराणसी।
8. स्व.पद्मभूषण उपाध्याय श्री बलदेव आचार्य, 2019 संस्कृत-वाङ्मय का बृहद् इतिहास(एकादश-खण्ड तन्त्रागम),उत्तर प्रदेश संस्कृत संस्थान, लखनऊ।
9. शर्मा रेग्मी श्रीशेषराज आचार्य, 2015, मेघदूत, चौखम्बा विद्याभवन, वाराणसी।
10. उपाध्याय श्रीबलदेव आचार्य स्वामी, 1953, भागवत् सम्प्रदाय, नागरी प्रचारिणी सभा, काशी।
11. चतुर्वेदी परशुराम, 1953, वैष्णवधर्म, विवेक प्रकाशन, इलाहाबाद।

Author's Detail
Address: Research Scholar
Department of Sanskrit & Prakrit Language
University of Lucknow, Uttar Pradesh, Bharat (India) 226007
Email: ajaylu96@gmail.com

****

[1] तत्रैव पृ. 172

[2] पद्मभूषण उपाध्याय श्रीबलदेव आचार्य, 2018 संस्कृत वाङ्मय का बृहद इतिहास, दशम-खण्ड वेदान्त (पृष्ठ-196) उत्तर प्रदेश संस्कृत संस्थान, लखनऊ

शुनःशेपोपाख्यानस्योद्भवो विकाशश्च विमर्शात्मकमध्ययनम्

(The Origin and Development of the legend of Śunaḥśepa: An Analytical Study)

Dr. Pradipkumar Mahapatra

Abstract

The Veda is a mass of words composed of mantras and Brahmanas. Among the Brahmanical literatures, the Aitareya Brahman within the Rig Veda occupies the foremost place. There are many kinds of anecdotes. One of them, and well known, is the story of Shunahshepo. The influence of Chopakhyana is seen not only in Vedic literature but also in post-Vedic literature. Where does the root of the story lie? Or how did the story of the anecdote unfold? What are the twisted forms? I will discuss the impact of the narrative on the present society or what it is like in this essay alone.

कुञ्चीशब्दाः - ऋग्वेदे शुनःशेपकथा, ऐतरेयब्राह्मणम्, बृहद्देवता, रामायणम्, महाभारतम्, राजसूययागश्चेत्यादयः।

****

भारतवर्षस्येतिहासस्योषाकालस्य सूचना वैदिकयुगादेव सम्भवति। अस्मिन्नेव वैदिकसाहित्ये सम्प्रदायस्या-स्यैकस्य सहस्रकालिकायाः आध्यात्मचिन्तायाः धारा सम्पूर्णरूपेण विकशिता। अद्यापि प्रचेष्टेयं कथञ्चित् प्रवाहिता। वैदिकज्ञानतप-स्विभिस्तेषां स्वाचरिततपोबलद्वारा विश्वसभ्यतायाः मङ्गलमभिलसन्ति स्म। तेषां भावनादयः प्रकाशिताः संहिताब्राह्मणारण्य-कोपनिषदादिषु। एतेषु विभागचतुष्टयेषु सर्वप्राचीनत्वात् ऋग्वेदस्य प्राधान्यं सर्वैरवाङ्गीक्रियते। परन्तु भाषावैज्ञानिकदृष्ट्या तथा च समाजशास्त्रीयदृष्ट्याध्ययनेन ब्राह्मणसाहित्यं हि मूर्ध्णि राराजते।

विश्वनिखिलस्यादितमो ग्रन्थो हि वेदः ऋगादिभेदेन चतुर्धा एव विभक्तुं युज्यते। आचार्येणापस्तम्वेनोक्तं- '**मन्त्रब्राह्मणयोर्वेदनामधेयम्**' इति। अर्थात् मन्त्रांश-ब्राह्मणांशयोरुभययोर्मेलनं हि वेदः। वैदिकसाहित्ये ब्रह्मशब्दस्य बहुधा अर्थे सन्निविष्टेऽपि कर्म इत्यनेन परिचीयते मुख्यतया इति तु निरुक्तकारैः भणितमेव। यत्तु ब्राह्मणसाहित्यैः सह अतीवता-त्पर्य्यतया कल्प्यते।[1] आद्युदात्त-क्लीवलिङ्गब्रह्मशब्दादेव ब्राह्मणशब्दस्य व्युत्पत्तिरिति, यस्यार्थस्तु चेतना शक्तिर्वा। मन्त्रेषु एव चेतनायाः विकाशो जायते। मन्त्रं मन्त्रशक्तिश्च द्वावैव ब्रह्म। तदाश्रयप्रवर्तिता विद्या प्रयोगकौशलं च ब्राह्मणम्।[2] ब्राह्मणस्येतरलक्षनान्यपि वर्तन्ते। आपस्तम्वेनोक्तं - '**कर्मचोदना ब्राह्मणानि**'। *आपस्तम्वश्रौतपरिभाषासूत्रे* भणितं - '**ब्राह्मणं नाम कर्मणस्तन्मन्त्राणां च व्याख्यानग्रन्थः**', जैमिमिनये- '**शेषे ब्राह्मणशब्दः**'। अर्थात् मन्त्रव्यतिरिक्तो वेदभाग एव ब्राह्मणम्।

सायणाचार्यदृष्ट्या मन्त्रव्यतिरिक्तो वेदभागः ब्राह्मणम्। सायणाचार्यस्य लक्षणं तु अधिकसङ्गतिपूर्णमिति मन्यते। ब्राह्मणसाहित्यं द्विधा एव विभज्यते – 1. ब्राह्मणारण्यकोपनिषदः। 2. यज्ञमार्गाणुसारिभिः विधि-अर्थवाद-निन्दा-प्रशंसा-पुराकल्प-परकृति-प्रभृतीनां षण्णां भेदेन ब्राह्मणसाहित्यस्य विषयाः निर्वाचिताः। ब्राह्मणसाहित्यन्तु स्वीयपरिधिद्वारा स्वकीयविषयवैचित्र्येण चैव वैदिकसमाजस्य संस्कृतेश्च महदाकररूपेण परिगण्यते उइन्टारनित्जप्रमुखैः

---

[1] निरुक्तम्. 12.38

[2] वेदमीममांसा - अनिर्वाण, पृ. 99

साहित्याचार्यैरिति।[1] ब्राह्मणसाहित्यस्य विषयेऽपि तेषामाचार्यानां मतानैक्यं दृश्यते।[2] शोधपत्रस्य विषस्तावत् ऐतरेयब्राह्मणसम्पृक्त इति कृत्वा आदौ ऐतरेयब्राह्मणस्य नामकरणविषये काचित् दृष्टिः प्रदेया।

ऐतरेयब्राह्मणस्य नामकरणं विषयश्चैव - ऋक्संहितायाः ब्राह्मणद्वयमुपलभ्यते। *ऐतरेयब्राह्मणम्, शाङ्खायनब्राह्मणं* च। ऐतरेयब्राह्मणस्य रचयिता संकलयिता वा महीदासः, इतरायाः आत्मजः इति कृत्वा ऐतरेयब्राह्मणम् इति। ग्रन्थेऽस्मिन् चत्वारिंशदध्यायाः वर्तन्ते। तत्र प्रथमे षोडशे अध्याये ज्योतिष्टोमाख्यस्य सोमयागस्य वर्णना, तदुत्तरे अध्यायद्वितये गवामयननामकस्य संवत्सरसाध्ययागस्य परिचयः, ऊनविंशतितः चतुर्विंशति-अध्यायं यावत् द्वादशाहाख्यस्य सोमयागस्य वर्णना, पञ्चविंशतितः द्वात्रिंशत् अध्यायं यावदग्निहोत्रहोमस्य विवरणम्, त्रयस्त्रिंशदध्याये राजसूययागस्य वर्णना चोपलभ्यन्ते। अत्र एव अध्याये शुनःशेपकथा सन्निवेशिता वर्तते।

शुनःशेपोपाख्यानस्य गुरुत्वम् - ब्राह्मणसाहित्यं खलु नैकविधाख्यानेन सम्पूरितमेव। वस्तुतस्तु बहुविधयज्ञ-प्रकौशलशैलीमुद्दिश्य तेषामपरिहार्यत्वमवबोधनाय ब्राह्मणसाहित्येषु नैकविधाख्यानादय उपस्थाप्यन्ते। कुत्रापि वा मानुषेषु यज्ञादीनां गुरुत्वावबोधनाय प्रकथनपद्धतिरियं प्रचलिता। अधुनैव जायते प्रश्नः यत् प्रचलितनैकविधकथासु शुनःशेपो-पाख्यानस्य गुरुत्वं कथमेवाङ्गीक्रियते? राजसूययागेन सह को वा सम्बन्धः? अत्रैव सम्पृक्तस्य पुरुषमेधयागस्य किं नाम प्रकृततात्पर्य्यम्? न केवलं वैदिकसाहित्येषु महाकाव्यपुराणधर्मनिरपेक्षसाहित्यादिषु उपाख्यानस्यास्य प्रभावः कथम्वा परिदृश्यते? एतेषामेवादीनां प्रश्नानामुत्तरमनुसन्धानयोग्यमिदानीमेव।

प्राचीनवैदिकसाहित्ये वर्तमानोपलब्धोपाख्यानादिषु शुनःशेपोपाख्यानमतीव गुरुत्वपूर्णतया मन्यते। यतो हि अत्रैव मानवलिदानप्रथा सवितर्केनोपस्थापिता, प्रकारेणानेनास्यान्तर्लीनगुरुत्वमावैदिकधर्मनिरपेक्षसाहित्यं यावत् वर्णितम्। इति।

उपाख्यानस्यास्य सारः - आख्यानस्यास्य भागत्रयं विद्यते। 1. हरिश्चन्द्रनारदसम्वादः। 2. हरिश्चन्द्रवरुणसम्वादः। 3. हरिश्चन्द्रपुत्ररोहित-औगर्ततनयशुनःशेपविश्वामित्रसंवादश्च। निखिलेऽस्मिन् उपाख्याने त्रिंशद्गाथा वर्तन्ते। कथेयमृग्वेदस्य संहितांशे बहुत्रैव सोल्लिखिता वर्तते। तत्र कथञ्चिद् वैमत्यमपि परिदृश्यते।

प्रथमतः- ऋग्वेदस्य पञ्चममण्डलस्य द्वितीयसूक्तस्य सप्तमे मन्त्रे पाशबद्धस्य शुनःशेपस्य मुक्तिदाता हि अग्निः परन्तु ऐतरेयब्राह्मणकथानुसारतः ऊषा हि मुक्तिदात्री इति।[3] प्रसङ्गेऽस्मिन् स्मर्य्यये सूक्तेऽस्मिन् कथं प्रकारेनाग्निः उल्लिखितः। मन्यते सूक्तस्यास्य ऋषिकुमारैः कथेयं विदिता चेद् ब्राह्मणस्यास्य अंशोऽयं पञ्चममण्डलात् प्राचीन इति।

द्वितीयतः- ऋग्वेदस्य प्रथममण्डलस्य सूक्तसप्तकानामृषिस्तु अजीगर्तात्मजः शुनःशेपः। तत्र स्पष्टतया यूपबद्धस्य शुनःशेपस्य प्रसङ्गश्चोपस्थापितः। अत ऋग्वेदस्य एते अंशादयः ऐतरेयब्राह्मणसमुपवर्णितस्य शुनःशेपो-

---

[1] हिस्ट्रि अफ् इण्डियान् लिटारेचार, खण्ड. 1, पृ. 187

[2] वेदमीमांसा, पृ. 103

[3] ऐतरेयब्राह्मण, 5.2.7

पाख्यानस्यान्तिमे संयुक्ताः इति। विषयोऽयमतीववितर्कजनकः। इदानीमस्माभिरैतरेयब्राह्मणवर्णितस्य शुनःशेपोपाख्यानस्य काहिनी उपस्थापयिष्यते।

ऐतरेयब्राह्मणानुसारतः इक्ष्वाकुवंशोद्भवः राजा हरिश्चन्द्रः अपुत्रक आसीत्। तस्य शतं जायाः वर्तन्ते। तथापि अपुत्रकश्चासीत् हरिश्चन्द्रः। एकदा तन्निवासे नारदपर्वतौ समुपस्थितौ। स नारदं पप्रच्छ - किं स्विद् पुत्रेण विन्दते? नारदः गाथयैकया पृष्टः सन् दशभिः गाथाभिः प्रत्युत्तरमुक्तवान्। तत्र गाथादिषु नैकविधप्रकारैः पुत्रस्य माहात्म्यं तेन सम्यक्तयोपस्थापितमेव। पुत्रेच्छानिमित्तकथनादनन्तरं पुत्रार्थिनं हरिश्चन्द्रं नारद वरुणमुद्दिश्य प्रार्थनाय आदिदेश। नारदोपदेशमङ्गीकृत्य हरिश्चन्द्रो वरुणमुपससार। 'पुत्रो मे जायतां, तेन तामुद्दिश्य यज्ञं करवानीति'। वरुणोऽपि तदीयपुत्रोत्पत्त्यै वरं सम्प्रदत्तवान्। तेन च वरेण रोहितः जातः।

अथ बहुभिः पर्य्यायैर्वरुणस्योक्तिर्हरिश्चन्द्रस्य प्रत्युक्तिश्चेत्युभयं प्रतिपाद्यते। हरिश्चन्द्रं वरुण उवाच- हे हरिश्चन्द्र तव पुत्र उत्पन्न एव। अतः अनेनैव पुत्रेण मामुद्दिश्य यागं कुर्विति। प्रकारेणानेन वरुणोक्तेः हरिश्चन्द्रः पुनः विविधप्रकारैः वचनैः तं प्रतारितवान्। एकदा स हरिश्चन्द्रः वरुणोक्तिमङ्गीकृत्य पुत्रमामन्त्र्यैवमुवाच। वरुणवरेण तेन रोहितः प्राप्तः इति कृत्वा पुत्रेण रोहितेन वरुणमुद्दिश्य यागरूपा पूजा करणीया। पुत्रः रोहितः पितुर्वाक्यं निषिध्य रक्षणार्थं धनुः स्वीकृत्यारण्यं प्रत्यागतोऽभूत्। कश्चिंश्चिदरण्ये नैरन्तर्येण स एव रोहितः संवतसरं चचार। वरुणक्रोधेण एव राज्ञः हरिश्चन्द्रस्य उदरी पीडा जाता। वार्तामिमां श्रुत्वा रोहितः अरण्याद्ग्रामं प्रत्याजगाम। तद्काले पुरुषरूपेण इन्द्रः तस्मै रोहिताय चरैवेति तत्त्वमुपदिष्टवान्।

चरन् वै मधु विन्दति चरन् स्वादुमुदुम्बरम्॥

तत्र षष्ठसम्बत्सरे रोहितः अरण्यविचरणकाले अजीगर्तनामकं क्षुत्पीडितं सूर्यवसस्य पुत्रं कंचिदृषिं प्राप्तवान्। तस्य शुनःपुच्छादिनामकास्त्रयः पुत्रा आसन्। मूल्येण तस्मात् पुत्रमेकं ग्रहणाय स ऋषिं निकषा प्रार्थयति। एवं सौर्यावसिः मध्यमं पुत्रं शुनःशेपं दानरूपेण प्रदत्तवान्। रोहितोऽपि शुनःशेपेन स्वकीयं ग्रामं प्रत्याजगाम। भूयान् वै ब्राह्मणाः क्षत्रियादिति। अतो वरुण एतत् राजसूयं यागं कर्तुं प्रोवाच। तदनन्तरे नैकविधभावेन शुनःशेपः नैकविधदेवतामुद्दिश्य यूपाय मुक्तिं प्रार्थयति। अन्तिमे च देवी उषा मातृमहिम्ना शुनःशेपस्य मुक्तिं चकार। तदुत्तरे विश्वामित्रेण स पुत्रत्वेन स्वीकृतः।

ऋग्वेदोपवर्णिता कथा - ऋग्वेदस्य संहितांशे शुनःशेपोपाख्यानस्य वृत्तान्तमुपलभ्यते। ऋग्वेदस्य संहितांशे शुनःशेपं दण्डे बन्धनाय दण्डात् मुक्तये वा इङ्गितं वर्तते, कुत्रापि वा शुनःशेपेन निगदिताः स्तूतयोऽपि वा प्राप्यन्ते। ऐतरेय-ब्राह्मणानुसारतः तस्य मुक्तेरुद्भावकः स्वयमेव शुनःशेप आसीदिति। प्रथमं तावत्प्रजापतिं सविधे **वास्य नूनं कतमस्या-मृतानाम्** इति मन्त्रद्वारा स्तुतिं चकार। यत्तु ऋग्वेदस्य प्रथममण्डलस्य चतुर्विंशतिसूक्तस्य प्रथममन्त्रेण तुलनीयः।[1] प्रजापति-द्वारा परिचालितः सन् स अग्नेः स्तुतिं चकार - **प्रथमस्यामृताणाम्**[2] इति मन्त्रद्वारा। तदनन्तरं

[1] ऋक् .1.24.1

[2] ऋग्वेदसंहिता 1.24.2

सवितृदेवस्य स्तुतिः क्रियते तेन - **अभि त्वा देव सवितः**[1] इत्यादिना मन्त्रद्वारा तदुत्तरैःएकत्रिंशत्संख्यकैः मन्त्रैः वरुणस्य प्रशंसनं चकार। **नमो महद्भ्यो ....**।[2] इति मन्त्रद्वारा विश्वदेवस्य प्रशंसा कृता। तदनन्तरमिन्द्रस्य प्रशंसा कृता - **यच्चिद्धि सत्य सोमपा.......**[3] मन्त्रैः, तदुत्तरै पञ्चदशमन्त्रैश्च (10.30.1-15)। एतेन प्रीतः सन् इन्द्रः शुनःशेपाय रथं सम्प्रददे। **शश्वद् इन्द्र.......**[4] मन्त्रैः इन्द्रं प्रति कार्तज्ञं विनिवेद्यते शुनःशेपेन। तदुत्तरैः मन्त्रत्रयैः[5] अश्विनदेवस्य प्रशंसा चकार। अन्तिमेन मन्त्रत्रयात्मकेन देव्याः उषसः स्तुतिः कृता विमुक्तश्च सः। यद्यपि अध्यापककीथमहाभागैः ऋग्वेदस्य मन्त्रैरेतैः सह ब्राह्मणकथितस्याख्यानस्य सम्पर्कं सम्पूर्णतयेस्वीकृतमेव। परन्तु अध्यापकनरहरिः मतमिदं स्वीकृतवान्।

तदुत्तरे वैदिकसाहित्ये उपाख्यानस्यास्य प्रभावः - उपाख्यानमिदं न केवलं वैदिकयुगे परन्तु तदुत्तरे वैदिके लौकिके च काले समानतन्त्रेण जनप्रियपदवीमिष्यते। यद्यपि उपाख्यानमिदमैतरेयब्राह्मणे तथा च ऋग्वेदस्य संहितांशे उपलभ्यते तथैव ब्राह्मणसमुपवर्णितस्य वृत्तान्तस्य संस्करणं कालेन विवर्तनीभूता जाता इति निश्चप्रचं वक्तुं युज्यते।

शाङ्खायन-श्रौतसूत्रे - ऋग्वेदसस्मपृक्तमितरब्राह्मणग्रन्थो हि *शाङ्खायनब्राह्मणम्*। तत्र ग्रन्थेऽपि शुनःशेपस्य आख्यानसम्पृक्तमध्यायमेकं वर्तते।[6] पाठवैचित्र्येणाप्यस्योपाख्यानस्य गुरुत्वमनुभूयते। *ऐतरेयब्राह्मणम्*नु पाठं वर्तते। अध्यापकम्याक्समूलारमहाभागैः मतमिदञ्चाङ्गीकृतमेव।[7]

बृहद्देवतायाम् - शौनकप्रणीते *बृहद्देवता*ख्ये ग्रन्थे *ऐतरेयब्राह्मण*सम्पृक्तवृत्तान्तमेव पुनः अनुवर्तते। विशेषतः शुनःशेपस्य इन्द्रस्तुतौ प्रीतः सन् इन्द्रः तस्मै स्वर्णरथं प्रदत्तवान् इति।[8]

सर्वाणुक्रमम्याम् - कात्यायनप्रणीते *सर्वाणुक्रमणी* इति ग्रन्थे शुनःशेपस्य परिचय उपस्थास्यते। यः खलु शुनःशेपः अजीगर्ततनयः, *ऋग्वेद*स्य प्रथममण्डलस्य चतुर्विंशतिसंख्यकस्य सूक्तस्य ऋषिश्च। तदुत्तरे वैश्वामित्रो देवरातः।[9]

महाकाव्यादिषु पौराणिकसाहित्येषु च वैदिकशुनःशेपकथायाः विवर्तनं वितर्कश्च - महाकाव्येषु पुराणादिषु च वैदिकशुनःशेपकथा कथञ्चित् विवर्तिता। आदौ तु *रामायणं* प्रति वयं दृष्टं दद्मः। *रामायणा*नुसारेण आसीत् शुनःशेपः ऋचीकस्यात्मजः। तस्य पिता लक्षपरिमितस्वर्णमुद्राविनिमयेन तस्मै अयोध्यावास्तवाय नृपतये अम्बरिशाय च शुनःशेपं सम्प्रददे। कालेन पथिषु पुष्कराख्ये ह्रदसन्निकटे फलाहारेण क्लिष्टमुग्रतपस्विनं विश्वामित्रं ददर्श। अरुदन् स विश्वामित्र-

---

[1] ऋग्वेदसंहिता, 1.24.4-5

[2] ऋग्वेदसंहिता, 1.27.13

[3] ऋग्वेदसंहिता, 1.29

[4] ऋग्वेदसंहिता, 1.30.1-16

[5] ऋग्वेदसहिता, 1.3.17-19

[6] शाङ्खायनब्राह्मणम्, 15.17-27

[7] History of Ancient Sanskrit Literature. Pp. 573. Ff.

[8] स्तूयमानःशश्वदीतिप्रीतस्तुमनसाददौ।शुनःशेपायदिव्यंतुरथंसर्वहिरण्मयम्।बृहद्देवता, 3.103

[9] कस्यपश्चोनाजीगर्तिःशुनःशेपःसकृत्रिमोवैश्वामित्रोदेवरातः।।सर्वाणुक्रणी, सम्पा. म्याकडोनेलः, पृ. 6 .

मनुरुन्धितवान्। विश्वामित्रो मुग्धः सन् तस्य सन्तानादीनां परामर्शेण तस्मै शुनशेपाय सूक्तद्वयं पाठयितवान्। तस्य दण्डबन्धनसमये शुनःशेपेन मन्त्रो आवृतः मुक्तश्च जातः इन्द्रानुग्रहेण।[1]

***महाभारते* समुपन्यस्ता शुनःशेपकथा -** न केवलं *रामायणा*दिषु परन्तु भारतवर्षस्य प्राणभूतस्वरूपे *महाभारते* अपि कथेयं प्रचिलिता। *महाभारते* यथा *रामायणे* शुन:शेपं ऋचीकस्यात्मजत्वेन स्वीकृतस्तथैव। परन्तु अत्र अम्बरीषं व्यतिरिच्य हरिश्चन्द्राय शुन:शेपं सम्प्रददे इति प्राप्यते। या खलु वैदिकमार्गानुसारिणी। ऐतरेयब्राह्मणोल्लिखिता इतरकथास्तु महाभारते सम्यक्तया चोल्लिखिताः वर्तन्ते। यथा विश्वामित्रेण शुनःशेपज्येष्ठत्वेनाङ्गीचक्रे, इतरपञ्चाशेभ्यः शापादीनि प्रदीयन्ते च।[2]

पौराणिकसाहित्येषु शुनःशेपकथायाः विवतर्नम् - पौराणिकसाहित्ये उपाख्यानसंस्करणविषये प्रभिन्नमतद्वयं प्राप्यते। यद्यपि ***श्रीमद्भागवतमहापुराणे*** (9.7) ***देवीभागवतमहापुराणे*** (7.14-17) च *ऐतरेयब्राह्मण*स्य पाठमेवाङ्गीक्रियते परन्तु ***हरिवंशपुराणे*** (1.27) *रामायण*स्य कथा एव सम्यक्तया अनुसृता। यद्यपि अत्र तु हरिदश्वाख्यस्य नृपतेः वर्णनं चकार। ***विष्णुपुराण***मते देवैः विश्वामित्राय शुनःशेपः सम्प्रदीयते। इति कृत्वा देवरात इत्यनेन परिचीयते खलु। अत्रापि हरिश्चन्द्रस्य आत्मजस्य रोहितस्योल्लेखं दृश्यते।[3] ***वायुपुराणं*** तु महाभारतमार्गापेक्षि वर्तते। तत्र शुनःशेपो मृचीकस्य पुत्रत्वेनाङ्गीक्रियते। हरिश्चन्द्रस्य बलिदाने शुनःशेपो यूपबद्धरूपेण स्वीकृतः। पुनश्च तत्र पुत्रेषु प्राधान्यमपि दृश्यते।[4]

धर्मनिरपेक्षसाहित्येषु शुनःशेपःकथा - धर्मनिरपेक्षसाहित्येष्वन्यतमा सुप्रसिद्धा च वर्तते *मनुसंहिता*। तत्र खलु ग्रन्थे (10.105) उल्लेखितं यत् अजीगर्तः पुत्रस्य बलिप्रदानेन किमपि अपराधबोधमस्वीकृतवान्। केवलं स्वकीयपरिजनानां परिवारानाञ्च क्षुधानिवृत्तये तेन कार्यमिदं कृतमिति। तथा चोच्यते-

अजीगर्तः सुतं हस्तमुपासर्पद्बुभुक्षितः।
न चालिष्यत पापेन क्षुत्प्रतीकारमाचरन्॥[5]

ग्रन्थस्यास्य प्रख्यातभाष्यकारैः भट्टकुल्लुकैः आत्मजस्य स्वकीयस्य नाम शुनःशेप इति प्रदत्तमेव। पुनश्च कथायाः अस्याः निदानं तु वह्वृचब्राह्मणमिति निर्देशितम्।[6]

पर्य्यालोचनम् - शुनःशेपकथायाः पाठान्तरत्रयं खलु विद्यते। 1. *ऐतरेयब्राह्मणे* उक्तं यत् अजीगर्ततनय: शुनःशेपः राज्ञः हरिश्चन्द्रस्य यज्ञकर्मणि बलिरूपेण स्वीकृतः। 2. *रामायणे* उक्तं यत्- ऋचीकस्यात्मजः शुनःशेपः अम्बरीषस्य यज्ञ-कर्मणि बलिरूपेण आनीतः। 3. पुनश्च *महाभारते* राज्ञः हरिश्चन्द्रस्य उल्लेखेन ऐतरेयब्राह्मणमनुसर्य्यते

---

[1] रामायणम् 1.6.1-2

[2] महाभारतम्-6.6.7

[3] विष्णुपुराणम्-4.3

[4] वायुपुराणम्, पृ.331

[5] मनुसंहिता- 10.105.

[6] मनुस्मृतिः, कुल्लुकभट्टस्यमन्वर्थमुक्तावलीसहितापृ. 415. सम्पा. पि. एइच्. पाण्ड्येय।

पुनश्च *रामायणा*-नुसारेण शुनःशेप ऋचीकस्य पुत्रत्वेनाङ्गीक्रियते। रोह्वहाभागैस्तदीये प्रबन्धे *ऐतरेयब्राह्मणं रामायणं महाभारतं हरिवंशं विष्णुपुराणं भागवतपुराणा*दिषु वर्णिताः शुनःशेपकथा एव विवेचिता।[1]अन्तिमे च तेन कथाया अस्याः संस्करणद्वयं स्वीकृतमेव। 1. *ऐतरेयब्राह्मणा*नुसारिणी। 2. *रामायणा*नुसारिणी च। एतयोर्मध्ये उत्तरकथा एव कालेन प्रचलिता अन्यतम-रूपेणैव इति वक्तुं युज्यते। पर्य्यालोचनेन ज्ञायते यत् भारतीयसाहित्येषु कथायाः अस्याः पाठान्तरत्रयमुपलभ्यते। एतेषु पाठान्तरेषु *ऐतरेयब्राह्मण*सम्पृक्तसंस्करणमधिकतया एव जनप्रियपदवीं लभ्यते। यतो हि तदुत्तरकालिकासु रचनासु तदेवानु-सृतम्। *रामायण*समुपवर्णिता कथा केवलं *हरिवंशे* प्रतिफल्यते। *वायुपुराणे* तु *महाभारतो*पलब्धा कथा एव अनुसृता इति।

शुनःशेपकथा-राजसूययागयोः सम्बन्धः - राजसूययागेन सह शुनःशेपकथायाः को वा सम्बन्धः? साधारणतया राजसूययागस्तु क्षत्रियराज्ञामभिषेककाले एव अनुष्ठितो भवति। तत्र अनुष्टानकर्मणि इष्टि-पशु-सोमादयः यागाः समप्राधान्यसम्पृक्ताः वर्तन्ते। तत्र पशुयागस्य पशुः गौरेव। मनुष्यपश्वादीनामाहुतिकथा तत्र नोपलभ्यते।[2] तर्हि राजसूययागे शुनःशेपबन्धनस्य तात्पर्यं किम्?अतीव गुरुत्वपूर्णतया प्रश्नरेकः उपस्थाप्यते अपि भारतीये प्राचीने वैदिकयुगे पुरुषमेधयागे पुरुषबधप्रथा नरबलिप्रथा वा प्रचलिता न वेति जिज्ञासायां सर्वैरेवाङ्गीक्रियते उपाख्यानमिदमिति।

साधारणतया वेदेषु पुरुषमेधयागस्य विधानं वर्तते। अयन्तु अश्वमेधतुल्यः सोमयागविशेषः पञ्चाहः अहीनक्रतु-विशेषः। तत्र पुरुषस्तु पशुतुल्यः। तत्र शतपथब्राह्मणे पुरुषमेधयागे पुरुषस्तु पशुतुल्यः इति प्रमाणीयते।[3] *तैत्तिरीय-ब्राह्मणा*-नुसारेण (3.4.1.1) पुरुषसूक्तं तु ब्रह्मणा एव उच्चार्य्यते। शतपथब्राह्मणे उक्तं यत् अग्निचयनकाले येषामेव पञ्चप्राणिनां मस्तिस्कादीनां प्रयोजनं विद्यते तत्र अन्यतमं हि पुरुषशिरः। वैखानस-श्रौतसूत्रे पुरुषमेधयागस्योल्लेखो दृश्यते। एतेन प्रमाणीक्रियते यत् वैदिकयुगे पुरुषमेधयागस्य तथा च पुरुषबधस्य प्रचलनमासीदिति।[4] पुरुषबधस्यानुकूले वेवारमहाभागैः मन्यते यत् प्राचीने काले इतालि-जार्मानि-प्रभृतिषु राष्ट्रादिषु वास्तुनिर्मानस्य प्राक्कग्ने यथा नरबलिप्रथा यथा प्रचलिता तथैव तु पुरुषमेधयागः। उइलसन्-हिलेब्राण्डट्-म्याक्समूलार्-राजेन्द्रलालमित्र-प्रमुखैः वैदिकाचार्यैः पुरुषमेधयागस्यानुकुलकाः। तैस्तु दृष्टान्तरूपेण शुनःशेपकथा उल्लिखिता। उपाख्यानस्य तात्पर्यविषये कथ्यते उपाख्यामिदन्तु प्रतीकात्मकानुष्ठान-सदृशमिति। अपुत्रकस्य हरिश्चन्द्रस्य पुत्रलाभानुष्ठानस्यार्थवादविशेषः इति वक्तुं युज्यते। इति शम्।

---

[1] वेवार, इण्डियानस्टाडिज,खण्डम्-2, पृ. 112-113.

[2] द्र. चिन्नस्वामीशास्त्री,यज्ञतत्त्वप्रकाशः, राजसूययागः, पृ.108-115

[3] शतपथब्राह्मण, 13.06.2.2

[4] हिलेब्राण्डट्- रिचुयाललिटारेचार्-145

सहायकग्रन्थसूची

1. अनिर्वाण. (2006). *वेदमीमांसा,* कलिकाता, संस्कृत बुक डिपो।
2. *ऋग्वेद,*(1358 BE). सम्पा.रमेशचन्द्रदत्त,कलिकाता,हरफ प्रकाशनी।
3. *ऐतरेयब्राह्मणम्,* (1980). सम्पा. सुधाकरमालवीय,वाराणसी,तारा प्रिन्टिं ओयार्कस्।
4. कात्यायन. (1886). *सर्वाणुक्रमणी,* सम्पा. म्याकडोनेल, अक्सफोर्ड, दि क्लेरिण्डन प्रेस.
5. चट्टोपाध्याय, अमर कुमार.(1411 BE). *वैदिक यज्ञ,* कलिकाता, संस्कृत पुस्तक भाण्डार.
6. *तैत्तिरीयब्राह्मणम्,*(1862). सम्पा.राजेन्द्रलाल मित्र,कलिकाता,वि.मिशन प्रेस।
7. *देवी भागवत,*(1813 VS). सम्पा.हरिचरण वसु,कलिकाता,शब्दकल्पद्रुम कार्यालय।
8. बन्द्योपाध्याय, शान्ति. (2008). *वैदिक युगेर यागयज्ञ,* कलिकाता, संस्कृत पुस्तक भाण्डार।
9. भट्टाचार्य्य, भवानीप्रसाद ओ अधिकारी, ताकरनाथ. (2008). *वैदिक संकलन,* कलिकाता, संस्कृत बुक डिपो।
10. मनु. (2012). *मनुसंहिता,* सम्पा. मानवेन्दु बन्द्योपाध्याय, कलिकाता, संस्कृत बुक डिपो.
11. यास्क.(2017). *निरुक्त,*सम्पा.अमरेश्वर ठाकुर,कलिकाता,कलिकाता विश्वविद्यालय।
12. वसु,योगीराज.(1957). *वेदेर परिचय,*कलिकाता, फार्मा के.एल.एम।
13. वाल्मीकि. (1913). *रामायणम्,* सम्पा. टी.आर.कृष्णाचार्य, निर्णय सागर प्रेस।
14. वेदव्यास. (2072 VS). *महाभारतम्,* सम्पा. रामनारायणपाण्डेय,गोरक्षपुर, गीता प्रेस।
15. वेदव्यास. (1314 BE). *विष्णुपुराणम्,* सम्पा. पंचानन तर्करत्न,कलिकाता,नवभारत पाब्लिशार्स।
16. वेदव्यास. (1314BE). *वायुपुराणम्,* सम्पा.पंचानन तर्करत्न, कलिकाता, नवभारत पाब्लिशार्स।
17. शास्त्री,चिन्नस्वामी. (1953). *यज्ञतत्त्वप्रकाशः,* सम्पा. रामनाथ दीक्षित,माद्राज, माद्राज ल जर्नल प्रेस।
18. *शांख्यायन श्रौतसूत्र,* (1891).,सम्पा.आलफ्रेण्ड हिलेब्राण्डट्, कलिकाता,वि.मिशन।
19. *श्रीमद्भागवत,* (1945). सम्पा.श्रीमद् पुरी दास,मयमनसिंह,श्रीशचीनाथ राय।
20. *हरिवंश,*(2052 VS). सम्पा.रामनारायणपाण्डेय,गोरक्षपुर, गीता।
21. Hillebrandt, A. (1897). *Ritual Literature,* Strasburg, Verlag Von Karl J. Trubner.
22. Max Muller. (1860).*History of Ancient Sanskrit Literature,* London, Williams and Norgate.
23. Saunaka.*The Brhaddevata.* (1904). Ed. A.A.Macdonell. Cambridge, Harvard University.
24. Winternitz, M. (2018). A History of Indian Literature, Delhi, Motilal Benarasidas.

Author's Detail

Address: सहायक-अध्यापकः, संस्कृतविभागे

राजा-प्यारीमोहन-कलेजे, उत्तरपाड़ा, हुगली, पश्चिमबङ्ग

Email: mahapatrapk1989@gmail.com

****

संस्कृतवाङ्मये प्रतीकात्मकरूपकाणां समीक्षणम्

(A review of Allegoric Plays in Sanskrit Literature)

Bhaskara Chatarji

Abstract

The word symbol is derived from the suffix kikach by the formula alika and others from the prefix in by derivation, perceived or known. This tendency of the word in the sense of limb, organ, body. Therefore, a metaphor in which dramatic characters are presented as symbols of basic objects is indeed a symbolic metaphor. Such metaphors are mainly characterized by the embodiment and humanization of abstract emotions. Images of objects and human emotions that have no perception or visibility in the worldly world are seen here as characters in metaphors. such as lust, anger, greed, delusion, ego, and so on. Although these are inanimate, it is the giving of life to them that characterizes such metaphors. These are treated as Allegorical Plays in English. The subject matter here is deep philosophical thinking and a sense of connected life. Although the creation and discussion of such metaphors in the West began long ago, they have also been widely developed and criticized in Sanskrit literature. Prabodhachandradaya, Sankalpasuryodaya, Yatirajavijaya, Chaitanyachandradaya – these are actually examples of this. This paper presents the origin of symbolic metaphors in Sanskrit literature, their extension and a critique of the content of some such metaphors.

कुञ्चीशब्दाः – प्रतीकम्, प्रतीकात्मकरूपकाणां वैशिष्ट्यम्, Allegorical Plays, प्रबोधचन्द्रोदयम्।

****

वैचित्र्यदृष्ट्या वैशिष्ट्यदृष्ट्या च संस्कृतरूपकाणाम् आभिजात्यम् आविश्वं सुप्रसिद्धं सर्वजनसमादृतञ्च राजते। रूपकं समाजस्य दर्पणं खलु। अतः समाजस्य सर्वविधक्रियाकलापाः, समाजिकविधिव्यवस्था, समाजे विद्यमानाः विविधसमस्याः - इति इमे विषयाः चिरन्तनकालादेव रूपकाणां विषयवस्तूनि अनुरञ्जयन्ति। विषयवस्तुनः साधु उपस्थापनाय नानाविधपद्धत्याः अपि आश्रयं स्वीचक्रुः क्रान्तदर्शिनः। तथाहि संस्कृतसाहित्यस्य निधिरूपेण कवीनां नव-नव-रचनारीतेः आविर्भावो सञ्जातः। प्रतीकरूपकमपि तादृशी काचित् नवीना सृष्टिप्रक्रिया यत्र अमूर्तपदार्थाः पात्रत्वेन समुपस्थापिताः। कुत्रचित् केवलम् अमूर्तपदार्थानामेव मूर्तकल्पना अस्ति कुत्रचित् पुनः मूर्तामूर्तयोः मिश्रितरूपं समुपलभ्यते। प्रतीकरूपकेषु सूक्ष्ममाणविकभावानां तथा गुणानाम् अभिव्यक्तये तेषां मानवीकरणं कृत्वा तथा तेषां प्रतीकरूपेण नाटकीयपात्रान् समुपस्थाप्य तेषामेव कार्यं वार्तालापादिकं प्रस्तूयते। अनेन निर्जीवभावगुणादिषु मानवीयवैशिष्ट्यानां समावेशनेन तेऽपि सजीववत् आचरन्ति। इयं खलु प्रक्रिया नितान्तं मनोहारिणी, श्लाघनीया सरसा च भवति।

ननु कुतः एतादृशभावना त्रिकालदर्शिकवीनां मनसि आगतेति चेत् वैदिकसाहित्यमेव तत्र उत्सभूमिः। वाङ्मनः-प्राण-इन्द्रियादीनां सम्भाषणविवादादिकं वेदे समुपवर्ण्यते। उदाहरणरूपेण वैदिकसाहित्यस्य कतिचित्प्रसंङ्गान् अत्र उपस्थापयामः। यथा कृष्णयजुर्वेदे –'अहं भद्रारं वाक्यं मनश्चार्तीयेताम्। अहं देवेभ्यो हव्यं वहामीति वागब्रवीत्, अहं देवेभ्य इति मनः। तौ प्रजापतिं प्रश्नमैतागम्। सोऽब्रवीत् प्रजापतिर्दूतीरेव त्वं मनसोऽसि। ... तस्मान्मनसा प्रजापतये जुह्वति'[1] – इति। ऋग्वेदस्य वाक्सूक्ते अपि अमूर्तायाः वाग्देव्याः स्वपरिचयज्ञापनस् अस्यैव उदाहरणम्। एवं

[1] कृष्णयजुर्वेदे ११-५-११४

सामवेदे अमूर्त्तायाः श्रद्धायाः मातृरूपेण उपस्थापनं दृश्यते – 'पितायत्कश्यपस्याग्निः श्रद्धा माता मनुः कविः[1]' – इति। छान्दोग्योपनिषदि पञ्चमे अध्याये यथा इन्द्रियाणां विवादविषये वर्णनमस्ति तदपि प्रतीकात्मकता एव। यथा – 'अथ ह प्राणा अहं श्रेयसि व्यूदिरेऽहं श्रेयानस्म्यहं श्रेयानस्मीति[2]' – इति। ऐतरेयोपनिषदि क्षुधा तृष्णा च तयोः कृते स्थानस्य व्यवस्थाय ईश्वरं प्रार्थयतः – 'तम् अशनायापिपासाभ्यामन्वार्जन्[3]'। प्रश्नोपनिषदि अपि सर्वेषाम् इन्द्रियाणां महाभूतानां तथा अन्तःकरणस्य मध्ये विवादस्य वर्णनमस्ति। एवंरूपेण वैदिकशास्त्रेषु बहुत्र प्रतीकात्मतायाः किञ्चित् वीजम् उपन्यस्तं दृश्यते। अस्यैव वीजस्य परिवर्धितरूपं खलु प्रबोधचन्द्रोदयम्, सङ्कल्पसूर्योदयम् इत्यादीनि रूपकाणि। एतादृशप्रतीकरूपकाणां संख्या यद्यपि सन्ति भूयसी तथापि तेषु केषाञ्चन निर्वाचितानामेव रूपकाणां वर्णितविषयमत्र समुपस्थाप्यते।

प्रबोधचन्द्रोदयम् – प्रतीकरूपकाणां प्रसङ्गे सर्वाग्रे यस्य नाम स्मृतिमार्गमवतरति तद्धि श्रीकृष्णमिश्रविरचितं प्रबोधचन्द्रोदयम्। संस्कृतरूपकपरम्परायां रूपकस्यास्य एकं विशिष्टं तथा महत्वपूर्णं स्थानं विद्यते। वैष्णवधर्मस्य माहात्म्यं वैशद्येन प्रकटयति ग्रन्थोऽयम्। अत्र महामोहः, कामः, क्रोधः, लोभः, चित्तम्, विवेकः वैराग्यम्, सन्तोषः, विष्णुभक्तिः, सरस्वती, श्रद्धा, शान्तिः इत्यादयः काश्चित् अस्माकं अनुभूतयः, केचित् सद्गुणाः, केचित् दुर्गुणाः चरित्रत्वेन समुपस्थापिताः वर्तन्ते। रूपकेऽस्मिन् षट् अङ्काः सन्ति यत्र सम्पूर्णस्य मानवजीवनस्य चित्रणमस्ति न तु एकस्य दोषस्य गुणस्य वा। मानवानाम् अन्तःस्थभावानां परस्परविरोधोऽपि रूपकेऽस्मिन् साधु प्रतिफलितः दृश्यते। विषयवस्तु प्रति दृष्टिं स्थापयामश्चेत् अत्र मानवहृदयानां स्वाभाविक-परस्परबिरुद्धाः याः चित्तप्रवृत्तयः सन्ति ताः विभागद्वयेन वर्णिताः सन्ति। एकत्र काश्चित् आत्मज्ञानलाभाय उन्मुखाः, काश्चित् पुनः ततः विमुखाः। एवं मनसः द्वयोः पुत्रयोः परस्परविरोधः चित्ताकर्षतया उपस्थापितः अत्र कविना। एकः अस्ति मोहः अपरः विवेकः। मोहस्य परिजनाः सन्ति – कामः, रतिः, हिंसा, लोभः, अहङ्कारश्च। मोहस्य एकः पुत्रः लोभः तथा तस्य पुत्रबधू तृष्णा। एतयोः सन्ततिः दम्भः। मिथ्यादृष्टिः अत्र कुलटारूपेण उपस्थापिता। एवमस्ति मोहस्य संसारः। पक्षान्तरे विवेकस्य परिजनाः सन्ति मतिः, करुणा, शान्तिः, श्रद्धा, क्षमा, सन्तोषः, वस्तुविचारः इत्यादयः। प्रथमपर्याये मोहाद् विवेकः किञ्चित् पराजितः एव भवति स्म, तस्य परिजनाः ये आसन् तेऽपि विच्छिन्नाः अभवन् परन्तु अन्ततः तस्यैव जयः सञ्जातः, यस्मिन् विष्णुभक्तेः प्रयासः सुमहान् आसीत्। एवमनेन मुख्यकथावस्तुना सह श्रद्धायाः तथा शन्तेः कथा अपि संयुक्ता अस्ति। दृश्यते यत् शान्तिः तस्याः जनन्याः श्रद्धातः वियुक्ता सञ्जाता। श्रद्धायाः उपरि दुष्टजनानाम् आक्रमणं सञ्जातं परन्तु सा विष्णुभक्तेः साहाय्येन कथञ्चित् विमुक्ता। अस्मिन् लघुकथानके सुनिपुनतया कविः जैनधर्मे, बौद्धधर्मे तथा ब्राह्मण्यधर्मे श्रद्धायाः अभावं वर्णितवान्। विविधसंग्रामात् परं अन्ततः सत्यपक्षस्यैव विजयः समजनि। राज्ञः मनसः स्वपुत्राणां तथा पत्न्याः प्रवृत्तेः वियोगे यदा प्रबलतया दुःखं जातम् तदा सः वेदान्तस्य सुसिद्धान्तमाकर्ण्य किञ्चित् धीरः सञ्जातः। अनन्तरं

---

[1] सामवेदस्य पूर्वार्चिकस्य आग्नेयकाण्डस्य प्रथमप्रपाठकस्य नवमखण्डस्य दशमः मन्त्रः

[2] छान्दोग्योपनिषदः पञ्चमोध्यायस्य प्रथमखण्डे

[3] ऐतरेयोपनिषदः प्रथमोध्यायस्य द्वितीये खण्डे

सोऽपि निवृत्तिं स्वपत्नीत्वेन स्वीकृतवान्। सर्वान्ते विवेकेन सह उपनिषदः मेलनम् अभूत्। तेभ्यः प्रबोधोदयस्य तथा विद्यायाः उत्पत्तिः सञ्जाता याभ्यां सर्वेषां संसारनिवृत्तिः समजनि।

सङ्कल्पसूर्योदयम् – श्रीमता वेदान्तदेशिकेन विरचितं दश अङ्कात्मकं रूपकं खलु सङ्कल्पसूर्योदयम्। अयं खलु नाट्यकारः चतुर्दशशतकस्य कश्चन महान् दार्शनिकः विद्वान् च। रूपकमिदं वेदान्तदर्शनस्य वैष्णवधर्मस्य च प्रतिपादकमस्ति। रूपकेऽस्मिन् मानवानां गुणाः, रूपम्, विवेकः, सुमतिः, मोहः, दुर्मतिः, लोभः इत्यादयः पात्रत्वेन कल्पिताः वर्तन्ते। एतेषु विवेकः तथा सुमतिः सात्विकगुणौ, मोहः दुर्मतिश्च तामसिकगुणौ। कृत्याकृत्यविवेकवान् विवेकः रूपकस्यास्य नायकः धीरोदात्तगुणान्वितः। सांसारिकबन्धनात् पुरुषस्य विमुक्तिसाधनमेव नायकस्य मुख्यम् उद्देश्यम् अस्ति। तथा हि नायकः विवेकः, नायिकां सुमतिं स्वीकृत्य पुरुषस्य सांसारिकसुखं प्रति विरक्तिम् उत्पाद्य समाधिं प्रति प्रचोदयितुं प्रयन्तरतः दृश्यते। पक्षान्तरे प्रतिनायकः मोहः यः खलु विवेकस्य शत्रुः सोऽपि स्वपत्न्या दुर्मत्या साहाय्येन पुरुषस्य भोग्यवस्तु प्रति आकर्षणं वर्धयित्वा भौतिकसंसारेऽस्मिन् बन्धनार्थं प्रयत्नं करोति। अन्ततः यथा सर्वत्रैव सत्यस्यैव जयं भवति तथैव अत्रापि विवेकः सपरिवारमोहं पराजित्य पुरुषञ्च परब्रह्मणि समाधिमग्नं कारयित्वा भगवत्कृपया लभ्यमानेन भगवत्संकल्पेन संसारबन्धनात् मुक्तिं साधयित्वा परब्रह्मसायुज्यं तथा मोक्षं प्रापितवान्।

यतिराजविजयम् – श्रीवरदाचार्येण विरचितं सुप्रसिद्धं सर्वजनश्लाघनीयं यतिराजविजयनामधेयं रूपकमपि अस्याः एव श्रेण्याः अन्तर्गतम्। अङ्कसंख्या अत्रापि प्रबोधचन्द्रोदय इव षट् एव। रूपकस्य नायकः राजा वेदमौलि, पट्टमहिषी सुमतिः अत्र नायिका। मायावादः खलु महामन्त्री, भास्कर-यादवादयश्च अन्ये मन्त्रिणः। चार्वाक-बौद्धादयः मायावादसहायाः। मिथ्यादृष्टिः वेश्या। एवं चार्वाक-बौद्धादिसहायेन मायावादेन मुख्यमन्त्रिणा मिथ्यादृष्टिवेश्यासंसर्गेण प्रतारितं वेदमौलिं राजानं, तत्सखायेन भगवता श्रीमद्यामुनाचार्येण प्रचोदितः श्रीमान् यतिराजः श्रीभगवद्रामानुजमुनिः, तान् सर्वानपि निर्जित्य प्रतिपक्षिणः, सुनीतिसहचारिणीं सुमतिं विष्णुभक्तिस्वरूपां पट्टमहिषीं राज्ञा च सङ्गमयन्, तं च परब्रह्मानुभवास्वादानन्दैकसाम्राज्ये अभिषिञ्चति – इति अलौकिकेऽस्मिन् नाटकेऽयं वर्णयति कविसार्वभौमः।

चैतन्यचन्द्रोदयम् – षोडशशतके कर्णपूर-उपाधिना विभूषितेन कविप्रवरेण परमानन्द-सेनेन दशाङ्कयुतं रूपकमिदं विरचितं चैतन्यचन्द्रोदयमिति। रूपकविरचने कविरयं कृष्णमिश्रविरचितेन प्रबोधचन्द्रोदयेन प्रचोदितः इति समालोचकानाम् अभिमतिः। चैतन्यदेवस्य तिरोधाने उत्कलराजप्रतापरुद्रस्य शोकापनोदनाय रूपकमिदं विरचितं कविना। रूपकस्य प्रथमतः पञ्चाङ्केषु चैतन्यमहाप्रभोः पुरिधाम्नि निवासविषये तथा अन्तिमपञ्चाङ्के जीवनस्य अन्तिमकालस्य केषाञ्चन वर्षाणां वर्णनमस्ति। कलिः, अधर्मः, विरागः, भक्तिदेवी, गङ्गा, रत्नाकरः प्रमुख-पौराणिकचरित्राणां तथा चैतन्यानुरागिभक्तवृन्दानां समन्वयेन रूपकमिदं विरचितं कविना। चैतन्यदेवस्य आविर्भावकारणं तथा च पार्षदवृन्दैस्सह चैतन्यजीवनस्य विविध-अलौकिकघटना, प्रेमलीला प्रभृतिवृत्तान्ताः रूपकेऽस्मिन् विविधैः दृशैः अङ्कैश्च रूपायितं वर्तते। चैतन्यभक्तिः एव मूलतः रूपकस्य विषयवस्तुः। तथा ह्यत्र स्वानन्दावेश-नामके प्रथमाङ्के चैतन्यदेवस्यजन्मवृत्तान्तम्, अस्माच्च अधर्म-कलियुगयोः दुःखाभिव्यक्तिः, श्रीवास-हरिदास-अद्वैत-विश्वम्भरप्रभृतीनां विविधकार्यकलापानां वर्णनमस्ति। तृतीयाङ्केऽत्र कृष्णस्य रासलीलाविषयकस्य एकस्य

रूपकस्यापि अभिनयः दर्शितः। अनन्तरं संसारजीवनं प्रति विरक्तस्य विश्वम्भरस्य सन्यासजीवनस्य वर्णनम्, देशस्य विविधप्रान्तेषु तस्य भ्रमणम्, तस्य अवतारत्वलाभः, भक्तवृन्तानां तस्मिन् श्रद्धाप्रदर्शनम्, कृष्णसंकीर्त्तनप्रवचनम्, गोपिनीभिः सह कृष्णस्य विविधलीलाप्रदर्शनम् इत्यादिघटनाः रूपकेऽस्मिन् रोमाञ्चकरूपेण वर्णिताः॥

अमृतोदयम् – षोडशशतके श्रीमता गोकुलनाथेन विरचितम् अद्वितीयं रूपकमिदं खलु अमृतोदयम्। अत्र पञ्च अङ्काः सन्ति। न्यायदर्शनं रूपकस्यास्य आधारभूमिः। अत्रापि अपवर्गः, परामर्शः, निर्वेदः, निर्जरः. बुद्धमार्गः, श्रुतिः, कथा- प्रभृतयः चरित्ररूरेण उपस्थापिताः। रूपकस्यास्य प्रथमे अङ्के वर्णितमस्ति यत् शरीरस्थसमस्तकुप्रवृत्तीनां मूले अस्ति रागः। रागेन सह विरागस्य कथा अत्र प्रस्तावनांशे वर्णितमस्ति। प्रमितिः श्रुतेः कन्यारूपेण वर्णिता या खलु बौद्धसेनाद्वारा अपहृता। आन्वीक्षिकी स्वसैन्यैः गौतम-वात्सायन-उद्योत्कर-वाचस्पतिप्रभृतिभिः प्रमितिं समुद्धृतवान्। अनन्तरं प्रमितिः पुरुषाय प्रदत्ता परन्तु पुरुषः ताम् अविश्वसिति। पक्षान्तरे श्रुतिद्वारा न्यायपुत्रपरामर्शेन सह पक्षतायाः संयोगकरणस्य आज्ञा प्रदत्ता। मननसिद्धिनामके द्वितीये अङ्के चार्वाकेन सह उदयनस्य युद्धवृत्तान्तं दर्शितम्। कुमारिल-प्रभाकराभ्यां बहुधा प्रबोधितेऽपि उदयनः युद्धात् न प्रत्यागतवान्। अपि तु युद्धे सोम-सिद्धान्त-कापालिकप्रभृतिचर्वाकपक्षीयजनान् पराजितवान्। एवं निदिध्यासनसिद्धिनामके तृतीये अङ्के श्रुतेः काम-लोभादिविजयस्य प्रयासविषये, पुरुषेण सह अनुमिति-प्रमित्योः संयोगविषये, तथा संयमस्य कन्यया सिद्ध्या सह पुरुषस्य मिलनविषये वर्णितमस्ति। अन्ते अपवर्गस्य राज्याभिषेकस्य कथाऽपि अस्मिन्नेव अङ्के वर्ण्यते। अनन्तरं आत्मदर्शन-नामधेये चतुर्थे अङ्के पुरुषोत्तमस्य साक्षात्कारात्, जगतः तत्वाधिगमाच्च पुरुषस्य समाधिः निश्चितः सञ्जातः। सृष्टि-स्थिति-संहारस्य स्वरूपं समधिगम्य पुरुषः मुक्तिप्राप्तये सिद्धः सञ्जातः। रूपकस्यास्य पञ्चमोऽङ्कः अपवर्गप्रतिष्ठा नितान्तं रोमाञ्चकोऽस्ति। अत्र पुरुषस्य मोक्षप्राप्तेः वर्णनमस्ति। श्रवणादिक्रियाकलापेन पुरुषस्य अपवर्गप्राप्तिः भवतीति तु सत्यं परन्तु किं तावत् स्वरूपम् अपवर्गस्येति विचारचर्चायां श्रुतेः समक्षं बौद्धमार्गः, जैनमार्गः, पाशुपतमार्गः, वैष्णवमार्गः, मीमांसामार्गः, रामानुजमार्गः, शङ्करमार्गः प्रभृतयः सर्वेऽपि स्वस्वसिद्धान्तं प्रकटितवन्तः। परन्तु श्रुतिः एतेषां सर्वेषामपि मतं खण्डितवती, निर्वाणस्य मार्गञ्च प्रतिष्ठितवती। एवमस्ति वस्तुतः रूपकस्यास्य कथावस्तुः यद्धि नितान्तम् आकर्षकं जनप्रियञ्च।

धर्मविजयनाटकम् – षोडशशतकस्य अपरमेकं प्रतीकरूपकं भूदेवशुक्लविरचितं धर्मविजयनाटकम्। तदानीन्तन-धार्मिकपरिस्थितेः एकं सुस्पष्टं चित्रं रूपकेऽस्मिन् वर्णितमस्ति। शिवभक्तेः माहात्म्यप्रतिपादनमेव मूलतः रूपकस्यास्य विषयवस्तुः। पञ्च अङ्कैः सुगठितं खल्विदं रूपकम्। प्रतीकरूपकेषु इदमपि उत्कृष्टमेकम्। तथाहि अत्र – धर्मः, अधर्मः, वर्णशङ्करः, व्यभिचारः, अनाचारः, पौराणिकः, स्मार्तः, सत्यम्, अहिंसा इत्यादयः सामाजिकविषयाः पुरुषपात्रत्वेन तथा च ऊर्ध्वगतिः, नीचसङ्गतिः, पण्डितसङ्गतिः, दया, शान्तिः, परस्परप्रीतिः, परीक्षा, विद्या, विधवा इत्यादयः स्त्रीपात्रत्वेन समुपवर्णिताः वर्तन्ते।

विषयवस्तु प्रति ध्यानं दद्मश्चेत् वर्णशङ्करस्य तस्य पत्न्या नीचसङ्गत्या सह सम्भाषणेन प्रथमाङ्कस्य आरम्भः भवति यत्र सः कलियुगस्य वर्णाश्रमव्यवस्थाविषये चर्चां करोति। राजा धर्मः अपि कुलङ्गानानां पवित्रचरित्रविषये तथा

वर्णाश्रमविषये मनोराहिवर्णनं कृतवान्। वर्तमानकालविषये विविधदुःखं च प्रकटितवान्। अनन्तरं सः अधर्मनामधेयशत्रं पराजेतुं तथा च पुराणकथां श्रोतुं तीर्थयात्राय गतवान्। द्वितीयाङ्के अधर्मस्य चरेण व्यभिचारेण सह दृष्टिरागस्य कन्यायाः गार्हस्थजीवनयापनार्थं काशीप्रदेशागमनं तथात्वे च तत्रस्थजनानामुपरि तयोः प्रभावो वर्णितः अस्ति। अत्र काश्याः जनानां व्यभिचारपरायणतायाः तथा सिन्धु-कुरुक्षेत्र-काश्मीरस्थजनानाम् अनाचारेण प्रभावितानां धर्महीनतायाः दाम्भिकतायाश्च विवेचनमस्ति। अन्ते अनाचार-व्यभिचार-अधर्म-पौराणिकप्रमुखानां विविधाभिसन्धयः वर्णिताः सन्ति। तृतीयाङ्कस्य प्रारम्भे पण्डितसङ्गतेः प्रवेशः सञ्जातः यः खलु आत्महनने प्रयत्नरतः आसीत्। परीक्षा तां विमोचितवती। सा पुनः ज्योतिषी, धूर्तः, कर्मकाण्डे अनभिज्ञप्रमुखानां कपटतां प्रकाशितवती। रूपकस्य चतुर्थाङ्के अनृतस्य दण्डनिमित्तं व्यवहारसत्यस्य नियुक्तिः, अहिंसा-हिंसयोः विवादः, धर्माधर्मयोः विवादः, पञ्च महापापानां मृत्युदण्डप्रदानम् इत्यादिघटनाः वर्णिताः। अन्तिमे अङ्के गङ्गास्नान-प्रायश्चित्तयोः वार्तालापेन धर्माधर्मयोः सैनिकानां मध्ये संघटितस्य युद्धवृत्तान्तस्य वर्णनमस्ति। युद्धे राज्ञः धर्मस्यैव विजयः सञ्जातः। अनन्तरं सर्वशास्त्राय नमस्कारप्रदानपुरस्सरं भगवतः शङ्करस्य ध्यानोपदेशेन रूपकस्य परिसमाप्तिः सञ्जाता।

अत्र निर्वाचितानां केषाञ्चन रूपकाणां वर्णनं समुपस्थापितम्। अतानि व्यतिरिच्यापि सन्ति बहूनि। तेषु केषाञ्चित् रूपकाणाम् उल्लेखः विधीयते – 1. आनन्दरायस्य जीवानन्दम्। 2. यशःपालस्य मोहराजपराजयम्। 3. नल्लाध्वरीमहोदयस्य जीवन्मुक्तिकल्याणम्। 4. श्रीकृष्णदत्तमैथिलस्य पुरञ्जनचरितम्। 5. वारिचन्द्रसूरिमहोदयस्य ज्ञानसूर्योदयनाटकम्। 5. घनश्यामस्य प्रचण्डराहूदयम् - इत्यादीनि उल्लेखार्हाणि भवन्तीति शम्।

सहायकग्रन्थसूची

1. मिश्रः, रामचन्द्रः(१९५५) *प्रबोधचन्द्रोदयम्,* चौखम्बा-विद्या-भवनम्, बारानसी।
2. सुदर्शनाचार्यः, टि.के.भि.न (१९५६) *यतिराजविजयम्,* तिरुमल-तिरुपतिदेवस्थानम्, तिरुपतिः।
3. मैथिलः,श्रीकृष्णदत्त (१९५५) *पुरञ्जनचरितम्,* चैटरबुकस्टल्।
4. पण्डितः, केदारनाथः (१९४३) *नाट्यशास्त्रम्,* निर्णयसागरप्रेस, बोम्वाई।
5. मुखोपाध्यायः, विमलाकान्तः (२०१३) *साहित्यदर्पणः,* संस्कृतपुस्तकभाण्डारः, कोलकाता।

Author's Detail

Address: Research Scholar
Central Sanskrit University, Bhopal campus
Village, Post – Ichapur, Dist - Paschim Bardhaman, PIN- 713363

Email: vaskarchatterjee007@gmail.com

****

स्मार्तज्ञानपरंपरायां संस्काराणां प्रासङ्गिकता

(The Relevance of Rituals in the Smārta Tradition)

Mami Mahanta

Abstract

It is true that the dignity of India is unique and admirable among many nations in the world. Because the Vedas are the foundation point of the land of India. The Vedas, forgotten as breath from the lotus of the face of Srimad Bhagavatam, rejoice in the entire world. These Vedas are the cause of preservation of Indian culture. These are the oceans of the nectar of knowledge and the teachings of the Apta. All other scriptures appear like branches of a great and vast tree of the Vedas. Therefore it is said -

वेदो वृक्षो मूलकान्यत्र विप्रा अङ्गाः शाखाः धर्मकर्माणि पत्रम्।

तस्मान्मूलं यत्नतो रक्षणीयं छिन्ने मूले नैव शाखा न पत्रम्॥ इति

The great sages who saw the mantras composed the Kalpa Sutra to easily understand the meaning of the Vedas. In those Kalpa Sutras, more than a hundred religious texts devoted to Smarta knowledge shine as illuminators of Indian culture. The history of the importance of human activity to a healthy social order is found in the scriptures. The Smartajnana Tradition (theological tradition) is very widespread and well-known. It also includes very broad topics such as the varnashrama system, rituals, the five great sacrifices, religion and so on. Ritual is one of those human welfare issues and the best. It takes a long time to consider all the smart knowledge. Therefore, I have described the usefulness of rituals in human life in this paper.

From Vedic times to modern times, rituals are observed in this globe. For he is all-knowing, according to the words of Manu, and it is accepted that the Vedas are the seed of all knowledge. Although the Vedas are the ocean of knowledge, all eternal subjects are contained therein. But the proper arrangement of all the virtuous behavior required in human life to attain it is available in memory. Therefore, the rituals described in the Smarta Jnana Tradition must be criticized.This will enable us to know what kind of rituals are to be performed at what time and under what circumstances and what is the usefulness of rituals in life. Consequently, the disordered (unchained) human being in modern society strives to attain salvation by keeping his life chained and orderly.

कुञ्चीशब्दाः - संस्कारः, मनुस्मृतिः, याज्ञवल्क्यस्मृतिः, गौतमधर्मसूत्रं, संस्कारकल्पः चेति।

****

भारतीयजीवनसंस्कृतेः ज्ञानं संस्कारः चेति द्वे नेत्रे भवतः।यदा मानवः ज्ञानेन सह संस्कारयुक्तः भवति तदैव समाजे सः कीर्तितो परिपुष्टितः च भवति नान्यथा। यथा- मलिनपदार्थं प्रक्षाल्य पवित्रं योग्यञ्च क्रियते तथा च सुवर्णः अग्नौ तापयित्वा शुद्धः क्रियते तद्वत् जन्मजन्मान्तरेभ्यः सञ्चितानि दूषितानि कर्माणि संस्कारैः एव अपगच्छन्ति। अतः कथ्यते - **"संस्कारो हि गुणान्तराधानमुच्यते।"**[1] **इति** गुणान्तराधानमित्युक्ते मानवस्य मनसि सद्गुणानां व्यवस्थापनां तथा दुर्गुणानां वहिष्करणं भवति। सनातनसंस्कृत्यां गर्भप्राप्तेः प्राग्तः मरणपर्यन्तं संस्काराः विधियन्ते। संस्कारस्तु सूक्ष्मशरीरस्य मानसिकः शारीरिकश्च शुद्धीकरणाय विधिपूर्वकं क्रियाणां सामूहिकरूपः। **'सम्'** उपसर्गपूर्वकः **'कृञ्'** धातोः **'घञ्'** प्रत्ययेन एवं **'संपरिभ्यांकरोतौभूषणे'** इति सूत्रेण भूषणार्थे 'सुट्' प्रत्यये पुंलिङ्गे च **'संस्कारः'** शब्दः उत्पद्यते। यस्य व्युत्पत्तिः **'संस्करणं सम्यक्करणं वा संस्कारः'**। संस्कारः नाम परिष्करणं संस्करणं दुर्भावदहनं चेति। शब्दोऽयं आङ्गलभाषायां "Sacrament" अथवा "Ceremony" शब्दैः व्यवह्रियते। यस्यार्थः **'धार्मिकविधि-**

[1] चरकसंहिता-1.27

विधानम्'। तथा च लाटिन्भाषायां "Ceremonia" शब्दः संस्कारार्थे प्रयुज्यते। आत्मिकसौन्दर्यस्य आन्तरिकः वाह्यश्च प्रतीकः संस्कारः। जीवनस्य प्रत्येग्सोपानाय व्यवहारस्य नियमो संस्कारैरेव निर्धारितः। पवित्रनिर्मलार्थे मुण्डनार्थे रक्षणार्थे च व्यवह्रियते संस्कारशब्दोऽयम्। आर्यसाहित्येतिहासे संस्कारस्य भूरि भूरि प्रशंसा वर्तते। महर्षि आश्वालायनः कथयति -

अतः परं द्विजातीनां संस्कृतिर्नियतोच्यते।
संस्काररहिता ये तु तेषां जन्म निरर्थकम्॥[1] इति

भारतीयसंस्कृत्यां गृहस्थाश्रमस्य महत्वं सर्वोपरि। अस्य आधारेण एव सर्वाः जीवाः जीवनधारणं कुर्वन्ति। मनुस्मृत्यां त्रयाणाम् आश्रमाणां जीवनधारकः रुपेण प्रसिद्धिः लभते। अतः मनुना प्रोक्तम्-

यथा वायुं समाश्रित्य सर्वे जीवन्ति जन्तवः।
तथा गृहस्थमाश्रित्य वर्तन्ते इतराश्रमाः॥[2] इति
यस्मात्त्रयोऽप्याश्रमिणो ज्ञानेनान्नेन चान्वहम्।
गृहस्थेनैव धार्यन्ते तस्माज्जेष्ठाश्रमो गृहम्॥[3] इति

अर्थात् - यथा सर्वे जन्तवः वायुमाश्रित्य जीवन्ति तथैव गृहस्थाश्रममाश्रित्य अन्ये आश्रमाः तिष्ठन्ति। अपि च गृहस्थाश्रमः सर्वदा संस्कारसंयुक्तज्ञानेन अन्नेन च विशिष्यते। अन्ये सर्वे ज्ञानान्नादिकं गृहस्थात् स्वीकुर्वन्ति। अतः गृहस्थस्य सर्वप्रमुख्योद्देश्यः गृहस्थाश्रमस्य सम्यग्परिपालनं रक्षणञ्च। येन च ऋषिऋणं देवऋणं पितृऋणमिति ऋणत्रयात् जीवः विमुक्तिं प्राप्नोति।

गृहस्थजीवनं नियतं पवित्रञ्च कर्तुं भारतीयवैदिकऋषयः जीवनस्य प्रतिपदं संस्कारैः सह संलग्नं कुर्वन्ति। धर्मशास्त्रीयग्रन्थेषु संस्काराणां संख्या विषये विभिन्नाः मताः दरीदृश्यते। तथापि सर्वस्वीकृतः षोडशसंस्काराः सन्ति। एते षोडशसंस्काराः चतुर्भागेन विभक्ताः भवन्ति। यथा- प्राग्जन्मसंस्कारः, शौशवसंस्कारः, शैक्षणिकसंस्कारः, गृहस्थप्रवेशसंस्कारः चेति।

1.	प्राग्जन्मसंस्कारः	गर्भाधानसंस्कारः
		पुंसवनसंस्कारः
		सीमन्तोन्नयनसंस्कारः
2.	शौशवसंस्कारः	जातकर्मसंस्कारः
		नामकरणसंस्कारः

[1] आश्वालयन

[2] मनु.3.77

[3] मनु.3.78

		निष्क्रमणसंस्कारः
		अन्नप्राशनसंस्कारः
		चूडाकरणसंस्कारः
		कर्णवेधसंस्कारः
3.	शैक्षणिकसंस्कारः	अक्षरारम्भसंस्कारः
		उपनयनसंस्कारः
		वेदारम्भसंस्कारः
		केशान्तसंस्कारः
		समावर्त्तनसंस्कारः
4.	गृहस्थप्रवेशसंस्कारः	विवाहसंस्कारः
		अन्त्येष्टिसंस्कारः चेति

आर्यसाहित्येषु एतेषां संस्काराणां प्रयोजनं सर्वदा विशिष्यते। मानवानां संस्काराणां का उपयोगिता वर्तत्ते जीवनेऽस्माकं तद्विषये प्रायशः सर्वे विद्वद्वर्याः धर्मशास्त्रीयाः स्वमतं प्रकाशयन्ति। तेषु मतेषु कतिपय प्रमुखानां प्रयोजनानां चर्चा अत्र क्रियते। मनोः एवं याज्ञवल्क्यस्य विचारः सर्वप्रथमं ग्राह्यो भवति। यतो हि तेषां मतं वैज्ञानिकं लोकप्रसिद्धञ्च वर्त्तते।

1. गर्भबीजात्मकः दोषाणां निराकरणं संस्कारेण एव भवति - शुक्रशोणितयोः सम्बन्धेन गर्भजातः भवति। अतः तत्र गर्भदोषः दृश्यते। तर्हि मानवजीवनस्य प्रारम्भे काल एव बैजिकः तथा गार्भिकदोषाणां दूरीकरणं मानवसृष्टिकालं प्रारभ्य अद्यपर्यन्तं केवलं संस्कारेणैव भवति। मानवजीवने गृहस्थधर्मपरिपालनाय सर्वप्रथमं गर्भधानादिः संस्कारः अनुष्ठीयते। येन च गर्भसम्बन्धि दोषाणां निराकरणं भवति। तद्विषये सर्वश्रेष्ठधर्मशास्त्रज्ञः भगवान्मनुः एवमेव निर्दिशति-

गार्भैर्होमैर्जातकर्मचौडमोञ्जीनिबन्धनैः।
बैजिकं गार्भिकं चैनो द्विजानामापमृज्यते॥[1] इति

अर्थात्गर्भधानपुंसवनसीमन्तोन्नयनजातकर्मचूडाकरणोपनयनादि,नां संस्काराणां विधिपूर्वकमनुष्ठानेन बीजसम्बन्धीनो गर्भसम्बन्धीनो च दोषाणां दूरीकरणं भवति। याज्ञवल्क्यस्मृत्यामपि - **एवमेव समं यान्ति गर्भवीजसमुद्भवम्।**[2] एतस्यव्याख्यावसरे संस्कारभाष्यकारे प्रोक्तम्- **एवमुक्तेन प्रकारेण गर्भाधानादिभिः संस्कारकर्मभिः कृतैरेनः पापं शमं**

[1] मनु.2,27

[2] याज्ञ, 1.13

याति।[1] अर्थात् गर्भाधानादि संस्काराणां सम्पादनेन शुक्रशोणितसंबन्धि गात्रव्याधिसंक्रान्तिजनितानां दोषाणां शमनम् अवश्यं भवतीति।

2. संस्कारेण द्विजत्वं प्राप्यते - इदमपि निर्दिष्टमस्ति धर्मशास्त्रे यत् -जननकाले सर्वाः प्रजाः शूद्राः अपवित्राश्च जायन्ते। केवलं संस्काराणां विधानेनैव तेषां परिमार्जनं पूर्णविकासं च प्राप्य ते द्विजत्वं भजन्ते। मनुस्मृत्यौ टीकाकारोऽपि स्पष्टीं कोरति - **जन्मना जायते शूद्रः संस्काराद्विजः उच्यते।** मौञ्जीबन्धनेन मानवः द्वितीयं जन्मं (द्विजत्वं) प्राप्नोति- **मातुरग्रेऽधिजननं द्वितीयं मौञ्जिबन्धने।**[2] इति। तर्हि संस्कारस्तु द्वितीयजन्मनः व्यञ्जकः पुण्यदायकः शौचाद्याचारयुक्तः चेति मनुना स्पष्टं निरुपितम्। यथा – **उत्पत्तिव्यञ्जकः पुण्यः कर्मयोगं निबोधतः।**[3] **इति**

3. **स्वर्गमोक्षयोश्च संप्राप्तिः भवति -** मोक्षप्राप्तिरेव मानवजीवनस्य सर्वोच्चं लक्ष्यम्। **मुच्यते सर्वदुःखबंधनैर्यत्र स मोक्षः।** अर्थात् आध्यात्मिकाधिदैविकाधिभौतिकादित्रिविधदुःखानां आत्यन्तिकनिवृत्तिरेव मोक्ष इति। संस्कारेण **स्वर्गप्राप्तिः** भवति। येन च मानवः मोक्षमवाप्नोति। मनुस्मृतेः व्याख्याकार मेधातिथिमतानुसारेण संस्कारेणैव स्वर्गः तथा मोक्षस्य मार्गः सुलभेन प्राप्यते इति प्रतीयते।

"नहि कर्मभिरेव केवलंब्रह्मत्वप्राप्तिः।
प्रज्ञानकर्मसमुच्चयात् किल मोक्षः॥

एतैस्तु संस्कृतः आत्मनोपासनास्वधिक्रियते।"[4] शङ्खलिखितौ स्मृत्यौ च विहितमस्ति -

संस्कारैस्संस्कृतः पूर्वैरूत्तरैरनुसंस्कृतः।
नित्यमष्टभुवैर्युक्तो ब्राह्मणो ब्राह्मलोकिकः॥
ब्राह्मं पदमवाप्नोति यस्मान्न च्यवते पुनः।
नाकपृष्टं यशो धर्मं त्रिरीजानस्त्रिविष्टम्॥[5] इति

संस्कारेण एव जनाः सिद्धिं प्राप्तुं शक्नुवन्ति। हारितोऽपि स्पष्टं कृतम्संस्कारः द्विधा ब्राह्मसंस्कारः दैवसंस्कारः - च भेदेन।गर्भाधानादिस्मार्त्तोसंस्कारःब्राह्मसंस्काररित्युच्यते, पाकयज्ञहविर्यज्ञसौम्याश्च दैवसंस्कारः इत्युच्यते। ब्राह्मसंस्कारैः संस्कृतो मानवो ऋषिणां स्थितिं समनुप्राप्य तत्समानतां याति तथा तन्निकषा निवसति। यथा -"**ब्राह्मेण संस्कारेण ऋषीणां सलोकतां समागतां सायुज्यतां वा गच्छति इति।**[6] तेषां शास्त्रोक्तरीत्या परिपालनेन जनो ब्रह्मणः स्थितिमधिगच्छति।यतो हि जीवनस्य चरमोद्देश्यः मोक्षं संप्राप्तिः। यथा -

---

[1] याज्ञ, 1.13

[2] मनु, 2.169

[3] मनु, 2.68

[4] मनु, 2-2

[5] वी.मि,सं, 140

[6] वी, मि, सं, 139

स्वाध्यायेन व्रतैर्होमैस्त्रैविद्येनेज्ययासुतैः।

महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः॥[1] इति

तथा त्रिवेदाध्ययेनेन, मधुमांसवर्जनादिव्रतैः, सावित्रिचरूहोमादिभिः, देवर्षिपितृतर्पणैः, पञ्चमहायज्ञैः, ज्योतिष्टिष्टमादिभिः यज्ञैः च शरीरः ब्रह्मप्राप्त्यार्थं योग्यं भवति। अत्र तनु शब्देन शरीरात्व्यवच्छिन्नः आत्मा अपि गृह्यते इति कुल्लूकभट्टेन निर्दिश्यते। एते स्मार्तसंस्काराः ऐहिकमुष्णिकञ्च फलदायकाः भवन्ति।

वैदिकैः कर्माभिः पुण्यैर्निषेकादिद्विजन्मानाम्।

कार्यः शरीरसंस्कारः पावनः प्रेत्य चेह च॥[2] इति

अर्थात्, शुभैः वैदिककर्मभिः द्विजातीनां शरीरसंस्कारः क्रियते। स च संस्कारः शरीरस्य पवित्रतां द्योतयति तथा (अध्ययनादिः क्रियया) इहलौकिकं(यागादिः क्रियया) पारलौकिकं च पुण्यप्रदायकं भवति।

4. व्यक्तित्वस्य निर्माणं विकासञ्च भवति - सर्वेषां शास्त्रीयज्ञानानां मूलमुद्देश्यं समुचितव्यक्तित्वविनिर्माणम्। तत्कृते नैतिकगुणानां आवश्यकता वर्तत्ते। एते गुणाः धर्मशास्त्रे आत्मगुणाख्यास्सन्ति। संस्काराणां नियमपूर्वकमनुष्ठानेन आत्मगुणाः नित्यं वर्धते। गौतमधर्मसूत्रे तेषां विवेचनं स्पष्टं प्राप्यते। यथा-

"दया सर्वभूतेषु क्षान्तिरनसूया शौचमनायासो मङ्गलमकार्पण्यमस्पृहेति॥[3] इति

अर्थात् दया, क्षमा, अनसूया, शौचः, शमः, उचितव्यवहारः, निरीहता, निर्लोभता च अष्टानां नैतिकगुणानां विकासः संस्कारेण एव सम्भवति। ये ते अष्टात्मगुणाः इति उच्यन्ते। यदि कश्चिदक्तिव्यक्तिविशेषः संस्काराणाम् अनुष्ठानकाले एतैरष्टगुणैर्विभूषितो भवति सः एव ब्रह्मणः सान्निध्यं लभते। यथा-

अपि च" **यस्य तु खलु संस्काराणामेकदेशोऽप्यष्टावात्मगुणा अथ स ब्रह्मणः सायुज्यं सालोक्यं च गच्छतीति।**[4]"

अर्थात् द्विजत्वमूलकैः संस्कारैः सह यस्य पार्श्वे अष्टावात्मगुणाः सन्ति स एव ब्रह्मणः सायुज्यं सालोक्यं च प्राप्नोतीति।

अङ्गिरास्मृतिः –

चित्रकर्म यथानेकैरागैरून्मील्यते शनैः।

ब्राह्मण्यमपि तद्वत्स्यात् संस्कारैर्विधिपूर्वकैः॥[5] इति

अर्थात्- यथा सर्वाङ्गसुन्दरं चित्रं निर्मातुं बहूनां रङ्गानां समावेशो भवति तथैव चरित्रनिर्माणार्थं संस्काराणां विधिपूर्वकं परिपालनं सम्पादनीयम्।

---

[1] मनु, 2.28

[2] मनु., 2.26

[3] गौतम.सू.- 1.8.24

[4] गौतम.सू.- 1.8.26

[5] वी. मि, सं. भाग-1.पृ139

ऐहिकं पारमार्थिकञ्च प्रयोजनं साधयितुं संस्काराः जीवने अत्यावश्यकाः। संस्काराणां महत्वं प्रदर्श्य महर्षिः मनुः प्राह -

निषेकादिश्मशानान्तो मन्त्रैर्यस्योदितो विधिः।
तस्य शास्त्रेऽधिकारोऽस्मिञ्ज्ञेयो नान्यस्य कस्यचित्॥[1] इति

मानवजीवनं उत्तरोत्तरशुद्धं स्वच्छं पवित्रं सात्त्विकं तेजःपूर्णञ्च कर्तुं गर्भाधानात्प्रारभ्य श्मशानपर्यन्तं संस्काराः अवश्यविधेयाः द्विजातीयानाम्। यथा -

ब्रह्मक्षत्रियविड्शूद्रा वर्णास्त्वाद्यास्त्रयो द्विजाः।
निषेकाद्याः श्मशानान्तास्तेषां वै मन्त्रतः क्रिया॥[2] इति

उपसंहारः - उपयुक्तविवेचनेन एतत् सिध्यति। संस्कारैः मानवाः संस्कृतिसम्पन्नाः भवन्ति। येन च भारतीयसंस्कृतिः पस्फुटिता पुनर्जीविता च भवति। अद्यतनसमाजे मानवाः संस्काररहिताः सन् जीवन्ति। संस्कार विना जनाः वृद्धिहीनाः, ज्ञानहीनाः, मानसिकविकारग्रस्ताश्च भवन्ति। येन अस्माकं सनातनसमाजस्य विलोपः कलुषित-समाजस्य जागरणं च परिलक्ष्यते। संस्कारसंयुक्ताः जनाः आधुनिकसमाजाय दीपशिखासदृशा प्रतिभान्ति। मानवस्य अनुशासितजीवनस्य निर्माणकर्तारो भवन्ति एते संस्काराः।अतः मानवसमाजस्य उत्कर्षाय संस्काराणां विवेचनं तत्त्वावबोधनं सम्यगनुष्ठानं च अत्यन्तमपरिहार्यम्। यतो हि संस्कारैः सुसंस्कृताः मानवाः सर्वेषु कार्येषु योग्याः समाजस्य प्रेरकाः पोषकाश्च भवन्ति।

सहायकग्रन्थसूची

1. मित्रोमिश्रः, १९८७.वीरमित्रोदयः.चौखम्बा संस्कृत सिरिज् अफिस,वाराणसी.
2. डाँ. श्रीमती उर्मिला रूस्तगी, २००५.मनुस्मृतिः.जे.पी. पब्लिशिंग हाउस, दिल्ली.
3. डाँ पि.वि.काणे, १९९५.धर्मशास्त्र का इतिहास.. उत्तरप्रदेश हिन्दी संस्थान, लक्ष्मणपुरी.
4. प. श्यामसुन्दरलाल त्रिपाठी, १८३०. अष्टादशस्मृतिः. श्रीवेङ्कटेश्वर प्रेस, मुम्बई.

Author's Details

Address: Research Scholar (Ph. D.)
Department of Sanskrit
Pondicherry University, Puducherry, 605014

Email: mamimahanta796@gmail.com

****

[1] मनु-2.16

[2] या. स्मृ-1.10

हरिदाससिद्धान्तवागीशप्रणीते रुक्मिणीहरणमहाकाव्ये प्रतिफलितो व्याकरणशास्त्रसमयः

(The Principle of Grammar reflected in the epic poem *Rukmiṇīharaṇa*, Composed by Haridas Siddhanta Vāgiśa)

Madhumita Ghosh

Abstract

The word Veda, derived from the suffix ghañ of the verb vid, means knowledge, the oldest literature of the entire universe. But knowledge of the six parts of the Vedas is indispensable for understanding the truth of the Vedas. It is said in the Panini teachings that by the proper use of these one attains the Brahmaloka. Among the six Vedic organs, grammar occupies the foremost place. In the ancient Indian tradition, the names of fourteen places of learning are found. The essence of the fourteen sciences lies in the science of literature. There, in the branch of literature, poets from all over the region shone on their heads. Haridas Siddhanta Vagish is one of the most indeed Vangi poets who enriched Sanskrit literature through their writings in the twenty-first century. His predecessors were also literary practitioners. His skill in literary disciplines is evident as well as in grammar. Here, however, some grammatically relevant terminological terms used in the epic Rukminiharana are also discussed. Along with this, somewhere in other literature, the grammar opinion reflected is also discussed. Mayaka will be discussed in detail in this essay based on these topics.

कुञ्चीशब्दाः - व्याकरणम्, प्रत्ययः, लकाराः, रुक्मिणीहरणम्, गुणः, वृद्धिश्चेत्यादयः

****

विद्-धातोः घञ् प्रत्ययेन निष्पन्नस्य वेदः इति शब्दस्यार्थो हि ज्ञानम्, विश्वनिखिलस्य प्राचीनतमं साहित्यम्। विवृतक्रियातन्त्राः हि मन्त्राः। मन्त्राणां स्तुतिनिन्दाव्याख्यानविनियोगग्रन्थाः हि ब्राह्मणाः। मन्त्रब्राह्मणयोर्सम्मेलनम् एव हि वेदः। वेदस्य यथार्थावबोधनाय षण्णां वेदाङ्गानां ज्ञानं तु अपरिहार्यम्। पाणिनीयशिक्षायां कथ्यते एतेषां सम्यक् प्रयोगेणैव ब्रह्मलोकम् अवाप्यते।

"छन्दः पादौ तु वेदस्य, हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥
शिक्षा घ्राणं तु वेदस्य, मुखं व्याकरणं स्मृतम्।
तस्मात् साङ्गमधीत्येव ब्रह्मलोके महीयते"॥[1]

षड्सु वेदाङ्गेषु व्याकरणस्य स्थानं मूर्ध्णि वर्तते 'मुखं व्याकरणं स्मृतम्'।व्याकरणमिति पदस्य व्युत्पत्तिकथनावसरे उक्तं व्याक्रियन्ते विविच्यन्ते शब्दा अनेनेति शब्दज्ञानजनकं शास्त्रं हि व्याकरणम्। वि- आङ् - इत्युपसर्गाभ्यां कृ-धातोः ल्युटि करणे सिध्यति शब्दोऽयम्। भगवता पतञ्जलिनाप्युक्तम्- 'प्रधानं च षड्ङ्गेषु व्याकरणम्'।[2] तस्य शब्दानुशासने व्याकरणस्य पञ्च तावत् प्रयोजनान्युपस्थाप्यन्ते।

"रक्षोहागमलघ्वसन्देहाः प्रयोजनम्।

---

[1] पाणिनीयशिक्षा-41-42

[2] महाभाष्य, पस्पशा, 9

रक्षार्थं वेदानामध्येयं व्याकरणम्" ॥[1]

अर्थात् वेदमन्त्राणां रक्षार्थं, ऊहार्थं, लघ्वर्थं, आगमार्थं पुनश्च सन्देहनिरसनार्थं व्याकरणस्याध्ययनमनिवार्यमेव। छान्दोग्योपनिषदि व्याकरणं वेदानां वेदमिति आम्नातम्।[2] व्याकरणस्य गुरुत्वविषये वाक्यपदीयग्रन्थे महती युक्तिः समुपन्यस्ता।

'तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्।
सर्वविद्या पवित्रोऽयमधिविद्यं प्रकाशते' ॥[3]

यद्यपि साहित्यसंरचने प्रतिभा एव निदानं तथापि व्युत्पत्तिस्तु तावन्मुख्या। प्राचीनसाहित्यसमालोचकैः मङ्गलमहाभागैः प्रतिभातः व्युत्पतिः महद्रूपेण स्वीकृता। राजशेखरमतानुसारतः 'उचितानुचितविवेको व्युत्पत्तिरिति'।[4] इतरमतेन छन्दोव्याकरादीनां पाठाभ्यासेन उपार्जिता क्षमता हि व्युत्पत्तिः। यथा हि ध्वन्यते रुद्रटस्य ग्रन्थे - "छन्दो व्याकरण-कला लोकस्थिति-पदपदार्थविज्ञानात्।

युक्तायुक्तविवेको व्युत्पत्तिरियं समासेन"।[5]

कवयस्तु सर्वशास्त्रपारङ्गमाः प्राक्काव्यरचने कानि कानि विषयानि तावत् अध्येतानि-[6] इति कथ्यते आलङ्कारिकैर्वामनाचार्यैः। प्राचीनभारतीयपरम्परायां चतुर्दशविद्यास्थानानां नामान्युपलभ्यन्ते। कुत्रापि वा आयुर्वेद-धनुर्वेद-सङ्गीतार्थशास्त्रादिभिः अष्टादशविद्यास्थानानां नामान्युल्लिख्यन्ते।

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।
धर्मशास्त्रं पुराणञ्च विद्यास्त्वेताश्चतुर्दश॥
आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः।
अर्थशास्त्रं चतुर्थं च विद्या ह्यष्टादश स्मृताः॥[7]

चतुर्दशविद्यानां सारः एव निहितं साहित्यविद्यायाम्। तत्र साहित्यशाखायां निखिलप्रदेसेषु वङ्गीयाः कवयः मूर्ध्णि शुशुभिरे। स्मर्य्यते कश्चन पूर्वपठितः श्लोकः-

"काव्येऽपि कोमलधियो वयमेव नान्ये।
तर्केऽपि कर्कशधियो वयमेव नान्ये॥
दृश्येऽपि संयतधियो वयमेव नान्ये।

---

[1] महाभाष्यम्, पस्पशा, 6

[2] छान्दोग्योपनिषद्- 7.1.2

[3] वाक्यपदीयम्, ब्रह्मकाण्ड-14

[4] काव्यमीमांसा-5 अध्यायः।

[5] काव्यालङ्कारः 1.18

[6] शब्दस्मृत्यभिधानकोशाच्छन्दोविचितिकलाकामशास्त्रदण्डनीति पूर्वा विद्याः। काव्यालङ्कारसूत्रवृत्तिः।। 1.3.3।।

[7] विष्णुपुराणम्।

तन्त्रेऽपि यन्त्रितधियो वयमेव नान्ये" ॥

तत्र निखिलशास्त्रेषु वङ्गीयाः स्वमहिम्ना राराजन्ते। एकोनविंशतिशतके ये खलु वङ्गीयाः कवयस्तेषां लेखनीद्वारा संस्कृसाहित्यं समृद्धवन्तस्तेष्वन्यतमो हि हरिदाससिद्धान्तवागीशः। 1866 खीष्टाब्दस्य अक्टोवरमासि रविवासरे द्वाविंशतिदिवसे विधूमुखी-गङ्गाधरविद्यालङ्कारयोरात्मजतया हरिदासस्याविर्भावेन वङ्गीया धन्याः। तत्र फरिद्पुमण्डलान्तर्गते कोटालिपाडायां महापुरुषयोऽयं जनिं लेभे। एतस्यैव महापुरुषस्य पूर्वपुरुषा अपि साहित्यसाधकाः आसन्। यथा साहित्यशास्त्रेषु तस्य नैपुण्यं तथैव व्याकरणे अपि नैपुण्यं दृश्यते। **यद्यपि नामकरणं तु 'हरिदाससाहित्ये वैयाकरणशास्त्रसमयः' इति तथाप्यत्र तु रुक्मिणीहरणमहाकाव्यप्रयुक्तानां कतिपयानां वैयाकरणसम्पृक्तानां व्याकरणसिद्धानातानामालोचनं क्रियते। एतेन सह कुत्रचित् इतरसाहित्ये प्रतिफलितव्याकरणमतमपि चालोच्यते।** हरिदास आसीत् असाधारणो वैयाकरणविद्। तस्य प्रयोगनैपुण्येन व्याकरणशास्त्रं तस्य काव्यांशरूपेण विवेचितम्। यतो हि कथ्यते भामहेन -

न तच्छास्त्रं न तच्छिल्पं न सा विद्या न सा कला।
जायते यन्न काव्याङ्गम् अहो भारो महान् कवेः ॥[1]

पञ्चवर्षीयस्य वालकस्य विद्यारम्भो जायते खलु काशीचन्द्रवाचस्पतिमुप। एकादशवर्षे कलापव्याकरणस्य पाठारम्भो जायते पितामहासन्निकटे एव। ततः ब्रजकुमारविद्याभूषणस्य शिष्यस्तया स्वीकृतोऽयम्। तत्र व्याकरणशास्त्र-कथितवृत्तिचतुष्टयानां नामाख्यातयोः कृद्वृत्तेश्च द्वितीयप्रकणं यावत् तेनाधीतं करायत्तं च। कारकसमासादयस्तु पितामहेभ्यः उपगताः। पञ्चदशवर्षीयः वालकोऽयं कलापव्याकरण्योपाधिपरीक्षायां शब्दाचार्यमुपाधिं प्राप्य प्रथमस्थाम-ग्रहीत्। तस्मिन्नेव समये गद्यपद्यविरोचने तथा च कथने समर्थोऽभवत् सः। नाटकखण्डकाव्यादीनां लेखनकार्यमारभ्यते अस्मिन्नेव वयसि। एकोनविंशतिवर्षे कंसबध-जानकीविक्रम-शङ्करसम्भववियोगवैभवप्रभृतयः नाटक-काव्य-खण्ड-काव्यादयः विरचितवन्तः। नैयायिकप्रवररामनाथसिद्धान्तपञ्चाननेभ्योः भाषापरिच्छेदस्य पाठमग्रहीत्। तस्य **साहित्यकृतयः** 1. महाकाव्यम् - रुक्मिणीहरणम्। 2. दृश्यकाव्यम् - बङ्गीयप्रतापम्,मिवारप्रतापम्, शिवाजीचरितम्, विराज-सरोजिनी(नाटिका)। 3. स्मृतिग्रन्थः - स्मृतिचिन्तामणिः। 4. अलंकारग्रन्थः - काव्यकौमुदी। 5. टीकाग्रन्थः - महाभारतस्य भारतकौमुदी, अभिज्ञानशकुन्तलस्य अभिज्ञान कौमुदी, कल्पलता कादम्वरेः, दशकुमारस्य कुमार-सन्तोषिणी, उत्तररामचरितस्य सर्वार्थबोधिनी। 6. साहित्यदर्पणस्य कुसुम-प्रतिमा चेत्यादयः।

तस्य साहित्यकृतयस्तु अनन्ता एव। तत्र साहित्यशास्त्रेषु रुक्मिणीहरणं मुख्यमिति कथ्यते। वस्तुतस्तु संस्कृतसाहित्ये दृश्यश्रव्यभेदेन काव्यस्य भेदद्वयमालंकारिकैः भणितमेव। अत्र रूपकोपरूपके इति तु दृश्यकाव्यस्य भेदद्यमुपलभ्येते। श्रव्यकाव्यं गद्यं पद्यमिति कृत्वा द्विधा जायते। तत्र गद्यं पद्यं चम्पू इत्यतेन त्रिधा कुत्रचित् वा पञ्चधा जायते। पद्यकाव्यस्य महाकाव्यं काव्यं खण्डकाव्यं चित्रादीनि लभ्यन्ते। तत्र रुक्मिणीहरणन्तु महाकाव्यम्। यतः महाकाव्यस्य लक्षणावसरे उक्तं तत्र आलंकारिकैर्विश्वनाथकविराजैः-

---

[1] कायालङ्कारः-5.4.

सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः।

सद्वंशः क्षत्रियो वापि धीरोदात्तो गुणान्वितः॥[1]

तत्र एतत्कथितैर्लक्षणैः समं रुक्मिणीहरणस्य सादृशं विद्यते। यतो ह्यत्र नायकः द्वारकाधिपतिः कृष्णः सद्वंशजातः क्षत्रियः धीरोदात्तः गुणयुक्तः। रुक्मिणीहरणस्य सर्गसंख्या षोडश, काहिनी पुराणाश्रिता चेत्यादयः। अतः रुक्मिणीहरणं महाकाव्यमेकमिति कथ्यते।

तस्य साहित्यसंकलनेषु कुत्रापि व्याकरणं काव्यिकाकर्षणस्य प्रतिबन्धकरूपेण नोपलभ्यते। तन्मते व्याकरणं हि निखिलशास्त्रस्य चाखिलविद्यायाः द्वारस्वरूपम्। यथा द्वारमाध्यमेण गृहाभ्यन्तरेषु प्रवेशो जायते, तथैव व्याकरणस्यालोकवर्तिकया साहित्यशास्त्रेषु, कोषशास्त्रेषु, दर्शनशास्त्रेषु, निखिलज्ञानसागरेषु च प्रवेशो भवति एव। तस्य प्रतिफलनं जायते रुक्मिणीहरणमहाकाव्यस्य द्वितीये सर्गे षड्षष्टिसंख्यके श्लोके कुमाराणां शास्त्रज्ञानप्रसङ्गे-

"शब्दीयविद्या प्रतिहारिणीव ज्ञानस्य सोपानमवेक्षयंती।

अख्यातनामप्रथिता निनाय समस्तशास्त्रालयमध्यमेतान्"॥[2]

प्रकृति-प्रत्यय-विभक्ति-नामाक्यातोपसर्गधातुकारकसमासप्रभृतीनां व्याकरणप्रयुक्तानां मौलिकोपादानां ज्ञानं, तथा च वैयाकरणसिद्धान्तसम्मतपारिभाषिकशब्दानां ज्ञानं व्याकरणशास्त्रेषु सम्पृक्तमेव। एतादृशं ज्ञानं विहाय व्याकरणचर्चा अलीकतया कल्प्यते। धारणेयं तस्मिन् सम्यक्तया वर्तते। अतः खलु तस्य सहृदयप्रतिफलितेषु काव्यादिषु व्याकरणस्य कानिचित् उपादानान्यपि समुपलसन्ते।

1. सप्रत्ययं सप्रकृतिप्रयोगं विभक्तियुक्तंपुरुषान्वितं च।

गुणान्वितं बृद्धियुतं च पेथुः सांख्योपमं व्याकरणं कुमाराः॥[3]

2. सन्धिः स्वाङ्गेष्वनशनपतत्पित्तकुक्षौच शब्दः

धातुर्दृष्टेरुपरि चरितस्तद्धितं चित्तनिष्ठम्।

सत्सम्बन्धं सुपटु करणं कारकं मे समासो

राजत्यास्ये परमसुखकृन्मात्रमस्मिन्नदृष्टम्॥[4]

अत्र श्लोकद्वये कस्यचिद्दरिद्रस्य व्याकरणविदः अतीवमर्मस्पर्शतया मनोज्ञकाव्यद्वारा व्याकरणशास्त्रेषु प्रयुक्तपारिभाषिकशब्दद्वारा दरिद्रता प्रकाशिता। प्रकृति-प्रत्ययोः सम्यक्धारणा तस्मिन् वर्तते। तन्मते एकं विहाय भाषासु

---

[1] साहित्यदर्पणः, 6.315-316.

[2] रुक्मिणीहरणम्, 2.66.

[3] रुक्मिणीहरणम्, 2.28.

[4] वङ्गीयप्रतापम्, 6.9

तरस्य प्रयोगो न जायते। 1. इयं यथार्थ प्रकृतिः किलेति, तस्याः परः प्रत्यय एव जातः।[1] 2. प्रत्यमात्रं सोपसर्गं प्रकृतिशून्यञ्च।[2]

क्रिया विभक्तिश्च - अपि च विभक्तिक्रिययोः कानिचनानि वैशिष्ट्यानि तेनोल्लिखितानि रुक्मिणीहरणमहाकाव्यस्य चतुर्थसर्गस्य सप्तषष्टिसंख्यके श्लोके। तत्र ध्वन्यते-

'वदते हि पदं समेव यत् क्रियया तत्र तदन्यदुच्यते'।

अर्थात् धातोरुत्तरं कर्तृकर्मादिबोधकप्रत्ययश्चेत् तत्तदर्थबोधिका विभक्तिरन्तर्लीना जाता।

गुणवृद्धिश्चेत्यादयः - व्याकरणप्रयुक्तपारिभाषिकशब्दाः तैश्चोल्लिखिताः रुक्मिणीहरणमहाकाव्यस्य द्वितीयसर्गस्य अष्टाविंशतिः संख्यके श्लोके-

गुणान्वितं वृद्धियुतञ्च पेठुः सांख्योपमं व्याकरणं कुमाराः।

श्लोकेनानेन पारिभाषिकशब्दस्य बृद्धेः व्याख्यानेन व्याकरणशास्त्रेषु तन्नैपुण्यं परिदृश्यते एव। विधेय-हल्प्रत्याहारयोः व्यवहारमुल्लेखितवान् सः। हल्[3] इत्यनेन सर्वेषां व्यञ्जनानां बोधो जायते।

पर्य्यायवाचकशब्दानां विषये - तत्र रुक्मिणीहरणमहाकाव्ये कथञ्चित् अमरकोशोक्तपदानां प्रयोगः क्रियते, परन्तु तदुत्तरीयेषु साहित्येषु, एतेषामेव पदादीनां प्रयोगः साधारणतया नोपलभ्यते। यथा- वरिवस्या इत्यस्यार्थस्तु शुश्रूषा परिचर्या वा। रुक्मं नाम स्वर्णम्। (रु.1) कचहस्तम् इत्युक्ते केशपाशम् (रु.3.47)। शुचिप्रियः इत्युक्ते श्रृङ्गारप्रियः। (रु 3.65[4])। मातृशब्दस्य नैकबिधाः प्रतिशब्दादयः प्राप्यन्ते। यथा - मा[5], प्रसूतिः[6], जननी प्रभृतयः। सूर्यस्य चाप्यनेकानि नामान्यप्युल्लेखितानि तेन। यथा – अहर्पतिः, द्युमणिः, विकर्तनः, विरोचनः, भास्करः, रविः, अरुणः, दिवाकरः सविता, पतङ्गः, आदित्यः विभाषवान्, तरणी, अर्यमा, इना, तीव्रामसु, प्रभृतयः। अमरकोशप्रयुक्तानां प्रायशः सूर्यवाचकानां नामादीनां व्यवहारश्चापि तेन कृतः।

अव्ययविषये -

'सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्नवेति तदव्ययम्'॥

रुक्मिणीहरणमहकाव्ये अव्ययस्य विशेषवैशिष्ट्यं प्रतिफलितम्। विभक्तेरन्तिमे प्रयोगेऽप्येतस्य वैशिष्ट्यं नापि परिवर्तते। यथा च प्राप्यते-

---

[1] रुक्मिणीहरणम्, 2.16

[2] विराजसरोजिनी, 1.14

[3] परिमुक्तकाशितशितासिधराः .... द्विगुणाः।। रुक्मिणीहरणम् 13.9

[4] सुमन्त्रकैः पापनिवारिवारिभिः शुचिप्रियौ तावसि च द्विजः शुचिः।
रिपोर्विवर्णा वरवर्णिनी च तत् निषम्य दीनाऽक्षि जलेन मेदिनीम्।। रुक्मिणीहरणम्. 3.65

[5] रुक्मिणीहरणम्, 2.3,

[6] रुक्मिणीहरणम्, 2.2

विभक्तया परभाविन्या शून्यं तद्रुक्मिणी बलम्
असंख्यमेकरूपञ्च मेन आत्मानमव्ययम्॥[1]

समास-प्रत्ययविषये - समासप्रत्यययोर्बहुलव्यवहारोऽपि तेन तत्प्रणीतेषु साहित्येषु क्रियते। यथा मन्दुरोन्दुरिः इत्यस्यार्थस्तु गृहमुषिकः। कुत्रापि वाप्रचलितप्रत्ययानामुयोगोऽपि तेन कृतः। यथा प्रभाचन।(प्र-भा+चन्)। निशाति[2] इत्यस्यार्थस्तु राक्षसः। मार्जांशुकः[3] इत्यस्यार्थस्तु स्नानेर तोयाले (Bathing Towel)।

ल-कारादीनां प्रयोगवैचित्र्यं तु प्रतिफल्यते रुक्मिमीहरणे महाकाव्ये। पाणिनीये व्याकरणे यथा स्म-योगेन अतीतकालस्य बोधो जायते तथैव हरिदासेन रुक्मिणीहरणे महाकाव्ये अपि लट्-रूपेण सह स्म योगेन अतीतकालं विज्ञापितवान्।

मदप्रदा बहुविधदोहदः सदा तदन्तिकं स्म परिहरन्ति न ईप्सिताः॥ (1.35)

लुङ्लकारप्रयोगे आसीत् स सिद्धहस्तः। यथा 'अजीजनत्'- (जन्+ लुङ्) (रु. 1.36), अभूत् (रु. भू+लुङ्) (रु. 1.19) 'अधृत' (धृ+लुङ्) (रु. 1.30) 'समजनि', सम्-जन्+लुङ् (रु. 1.38) 'अवेदि' (विद्+लुङ्) (रु. 1.39) वैदिकसम्प्रयुक्तस्य लेट्लकारस्य प्रयोगोऽपि दृश्यते तस्य साहित्यकर्मसु। अतीतकालार्थे परोक्षे लिट्-लकारस्य प्रयोगोऽपि बहुलतया तस्य साहित्ये दृश्यते। तदुत्तरकालप्रचलितसाहित्यादिषु तथोक्ततया न दृश्यते। प्रसङ्गेऽस्मिन् स्मर्य्यते भर्त्तृहरिप्रणीतस्य भट्टिकाव्यस्य व्याकरणप्रयोगस्तथा च लिट्लकारादीनां प्रयोगः। काव्यमाध्यमेण व्याकरणावबोधनाय भट्टिकाव्यं यथा विरचितं तथैव हरिदासस्य रुक्मिणी-हरणमेव इति वक्तुं युज्यते। तत्र प्रथमसर्गस्य कतिपयेषु श्लोकेषु प्राप्यन्ते लिट्लकारस्य बहुलतया प्रयोगादयः। यथा प्रपप्रथे (41), शशास (16), चकाशिरे (45), मुमुदे (50), विवेष्टिरे (51), रराज (58) चेत्यादयः। यद्यपि हरिदासस्तु मुख्यतया कविः आसीत् तथापि प्रयोगो-नैपण्युनेन स वैयाकरणरूपेण प्रतिष्ठित इति।

सहायकग्रन्थसूची

1. कविराज, विश्वनाथ. (2013). *साहित्यदर्पणः*, सम्पा. विमलाकान्त मुखोपाध्याय, कलिकाता, संस्कृत पुस्तक भाण्डार।
2. चट्टोपाध्याय, ऋता. (2013). *महामहोपाध्याय हरिदास सिद्धान्तवागीशेर सारस्वत साधना*, कलिकाता, संस्कृत पुस्तक भाण्डार।
3. Winternitz, M. (2018). *A History of Indian Literature*, Delhi, Motilal Benarasidas.
4. पतञ्जलि, (2017). *महाभाष्य*, सम्पा. गङ्गाधर कर, कलिकाता, संस्कृत बुक डिपो।
5. पाणिनि. (2011). *अष्टाध्यायी*, सम्पा. गोपाल शास्त्री, वाराणसी, चौखम्बा सुरभारती प्रकाशन।
6. पाणिनि. (2016). *पाणिनीयशिक्षा*, सम्पा. अशोक कुमार बन्द्योपाध्याय, कलिकाता, सदेश।
7. भट्टाचार्य, पाँचुगोपाल, (1363). *श्रीमद् हरिदास सिद्धान्तवागीश स्मरणे*, कलिकाता, विश्ववाणी।
8. भट्टाचार्य, हरिदास सिद्धान्तवागीश. ((1870)). *रुक्मिणीहरणम्*, सम्पा. हेमचन्द्र भट्टाचार्य, सिद्धान्तयन्त्र, कलिकाता।

[1] रुक्मिणीहरणम् 15.4

[2] रुक्मिणीहरणम् 2.44.

[3] रुक्मिणीहरणम् 7.13

9. भर्त्तृहरि, (2007). *वाक्यपदीयम्,* सम्पा. विष्णुपद भट्टाचार्य, कलिकाता, पश्चिमवङ्ग राज्य पुस्तक पर्षद्।

10. मनु. (2016). *मनुसंहिता,* सम्पा. मानवेन्दु बन्द्योपाध्याय, कलिकाता, संस्कृत पुस्तक भाण्डार।

11. राजशेखर, (2008). *काव्यमीमांसा,* सम्पा. सीतानाथ आचार्य ओ देवकुमार दास, कलिकाता, सदेश,।

12. राजशेखर, (2013). *काव्यमीमांसा,* सम्पा. उदयचन्द्र बन्द्योपाध्याय ओ अनीता बन्द्योपाध्याय, कलिकाता, संस्कृत बुक डिपो।

13. वामन, (2015). *काव्यालङ्कारसूत्रवृत्तिः,* सम्पा. अनिलचन्द्र वसु, कलिकाता, संस्कृत वुक डिपो।

14. विश्वनाथ. (2006). *साहित्यदर्पणः,* सम्पा. उदयचन्द्र बन्द्योपाध्याय, कलिकाता, संस्कृत बुक डिपो।

15. सिंह. अमर, (1417). *अमरकोष,* सम्पा. गुरुनाथ विद्यानिधि, कलिकाता, संस्कृत पुस्तक भाण्डार।

16. स्वामी, गम्भीरानन्द. (2009) *उपनिषद् ग्रन्थावली,* कलिकाता, उद्बोधन।

Author's Detail

Address: अतिथि-शिक्षिका, संस्कृत विभागः, आनुड-उच्चविद्यालयः
आनुडः, हुगली, पश्चिमवङ्गः।

Email: madhumita89.mg@gmail.com

****

SUBMIT YOUR MANUSCRIPT

Call for Research Papers for 17th Issue of peer reviewed Research Journal

"प्राची प्रज्ञा" (ISSN 2348 – 8417)

महोदयाः !

"प्राची प्रज्ञा" (ISSN 2348 – 8417) इति सन्दर्भितान्ताराष्ट्रियान्तर्जालपत्रिकायाः "शास्त्रमञ्जूषा" इति षाण्मासिकखण्डस्य **सप्तदशावतरणस्य (2023-दिसम्बर-मासे प्रकाशयिष्यमाणस्य)** कृते अधस्तनविषयमवलम्ब्य मौलिकाः शोधलेखा आविश्वं विद्यमानेभ्यो विद्वद्भ्य आमन्त्र्यन्ते । A4 पृष्ठे 1.15 पङ्क्तिगतान्तरालसहिता न्यूनातिन्यूनं दशपृष्ठात्मका लेखा निम्नप्रारूपेणैव टङ्कयित्वा prachiprajnaenb@gmail.com इति अन्तर्जालसंकेतेन मृदुप्रतिकृतिरूपेणैव **30th June, 2023 (12:00 Midnight IST)** पर्यन्तं प्रेषयितुं शक्यन्ते।

शोधपत्रस्य विषयः / शीर्षकम्

मुख्यशीर्षकम् – "पाण्डुलिपिविज्ञानं पुरालेखशास्त्रं च"

उपशीर्षकाणि –

I. अप्रकाशितसंस्कृतमातृकाणां विवरणम्।
II. पाण्डुलिपिसंरक्षणप्रविधिः।
III. अप्रकाशितपाण्डुलिपिग्रन्थानां विवरणात्मकसूची।
IV. पाण्डुलिपिग्रन्थागाराणां तत्रोपलभ्यमानानामप्रकाशितपाण्डुलिपिग्रन्थानां विवरणम्।
V. प्राचीनभारतीयलिपिसु उपलब्धाप्रकाशितमातृकाणां परिचयः।
VI. कस्यचिदप्रकाशितपाण्डुलिपिग्रन्थस्य प्रकाशनम्।
VII. कस्यचिदप्रकाशितपाण्डुलिपिग्रन्थस्य पाठसमालोचनम्।
VIII. भारतीयलिपीनां विकासपरम्परा।
IX. शास्त्रविशेषमवलब्याप्रकाशितपाण्डुलिपीनां विवरणात्मकं सङ्कलनम्।
X. शारदा-नेवारी-टाङ्करीप्रभृतिषु प्राचीनलिपिसु विद्यमानानाम् अप्रकाशितपाण्डुलिपीनां समालोचनात्मकं संस्करणम्।

शोधपत्रस्य प्रारूपम् -

- शोधलेखाः संस्कृतभाषया/ Englishभाषया / हिन्दीभाषया वा 12/ 14 अक्षरमानेन A4 पृष्ठे 1.15 पङ्क्ति-अन्तरालेन समर्थ्यप्रान्तीयस्थापनपूर्वकं (Justified aligned) Microsoft Word आधारितसञ्चिकाप्रारूपमेवाश्रित्य टङ्किताः स्युः। संस्कृतभाषया हिन्दीभाषया च लेखाः Arial Unicode MS इति Unicode आधारितदेवनागरीलिप्या / रोमनलिप्या वा टङ्किताः स्युः।
- पादटिप्पणी / सन्दर्भसूची American Psychological Association (APA7) पद्धतिमनुसृत्य निर्मातव्या।

- पृष्ठसज्जाक्रमो अधोनिर्दिष्टरूपेण स्यात्
  1. शीर्षकपृष्ठम्
  2. शोधसारः - आंग्लभाषया 100 शब्दैः
  3. कुञ्चीशब्दाः -
  4. मूलपाठः पादटिप्पणीसहितः
  5. सन्दर्भः - APA7 अनुरूपः
  6. अनुक्रमणिका
  7. चित्राणि
  8. परिशिष्टानि
- शीर्षकपृष्ठम् अधोनिर्दिष्टप्रकारेण स्यात्
  1. शोधपत्रशीर्षकं – आंग्लरूपान्तरसहितं स्यात्
  2. निबन्धकारस्य नाम आंग्ल-देवनागरीलिपिभ्यां
  3. निबन्धकारस्य संस्थासम्बद्धता
  4. निबन्धकारस्य पत्राचारसंकेतः
  5. अणुपत्रसंकेतः
  6. दूरभाषसंख्या
- शोधपत्रेण सह स्वीयमेकम् सद्यः गृहीतं 3.5 x 4.5 cm परिमितं स्वीयं भावचित्रं 20 kb परिमितं (JPEG प्रारूपेण) अवश्यं प्रेषणीयम्।
- शोधपत्रेण सह घोषणापत्रस्य पूरितप्रारूपस्य अङ्कीयप्रतिमा (scanned copy of the filled in declaration form) अवश्यं प्रेषणीया ।
- विशेषज्ञमण्डल्या पुनरीक्षणोपरान्तं (Peer Reviewing) प्रकाशनयोग्याः शोधलेखाः प्रकाशयिष्यन्ते।

<u>प्रकाशनयोग्यतायाः मानदण्डाः निम्नवत् निर्धारिताः सन्ति-</u>

1. शोधलेखः स्वीयः मौलिकश्च स्यात्।
2. शोधलेखे विवेचनप्रक्रिया समस्याचयनत → आरभ्य क्रमेण प्राक्कल्पना → ततः समालोचनात्मकं मूल्याङ्कनं → तथा अन्ते शोधस्य मौलिकनिष्कर्षेण सहोपसंहारः इत्येवं क्रमवद्धतापुरःसरं विकसिता स्यात्।
3. शोधलेखे काचिन्नवीना अवधारणा, किमपि नवीनं तथ्यं, नवीनं मूल्याङ्कनं, नवीनः सिद्धान्तः, नवीना शैली, नवीनः संकेतो वा अवश्यमाविष्कृतः स्यात्।
4. शोधलेखस्य भाषा परिष्कृता, प्राञ्जला, स्तरानुगुणा च स्यात्।
5. शोधलेखे समसामयिकी सम्बद्धता, तार्किकम् अनुशीलनं, तथा सन्दर्भाणामौचित्यमवश्यं स्युः।
6. शोधलेखे अन्यस्य प्रकाशनस्यांशोद्धरणे तदनुमतिः अवश्यं स्वीकर्तव्या, यदि तादृशमुद्धरणं ५०० शब्देभ्योऽधिकमस्ति।
7. प्रकाशनात्परं शोधलेखस्य सर्वाधिकारः "प्राची प्रज्ञा" इत्यस्याः एव सुरक्षितः भविष्यति।
8. प्रकाशनसम्बन्धे पत्राचाराय शोधलेखेन सह प्रयुक्तान्तर्जालसंकेतः (Email ID) एव उपयोक्तव्यः।
9. सर्वाऽपि प्रक्रिया अन्तर्जालमाध्यमेनैव सम्पादयिष्यते। मुद्रितरूपेण न काचित् प्रक्रिया अवलम्ब्यते।
10. शोधलेखस्य प्रकाशनयोग्यताऽयोग्यतानिर्धारणदायित्वं "प्राची प्रज्ञा" इत्यस्यामेव न्यस्तं भविष्यति।

शोधपत्रेण सह प्रेषणीयानां सूची

1. **उपर्युक्तप्रारूपानुरूपः मौलिकः शोधलेखः**
2. **सद्यो गृहीतं 3.5 x 4.5 cm परिमितं स्वीयं 20 kb परिमितं (JPEG प्रारूपेण) भावचित्रम्।**
3. **प्रदत्तप्रारूपेण <u>घोषणापत्रम्</u>**

Call for Research Papers for 17th Issue of peer reviewed Research Journal

“प्राची प्रज्ञा” (ISSN 2348 – 8417)

Respected Scholars !

Research Papers on following topics in Sanskrit/ English/ Hindi are invited from the scholars of the entire globe for the **17th Issue (to be published in December, 2023)** of peer reviewed refereed, International Research Journal “**प्राची प्रज्ञा**” having ISSN no. 2348 – 8417, for its half yearly section “**शास्त्रमञ्जूषा**”. **The Last date of receipt of articles is 12:00 Midnight IST, 30th June, 2023**.

A submission to “**प्राची प्रज्ञा**” must be an original work. The paper in not less than 10 pages, should be emailed to prachiprajnaenb@gmail.com in e-copy only. A submission must fulfil the following criterion”

Subject Area of the Research Paper:

Main Title: “**Manuscriptology & Epigraphy**”

Subtitles:

I. Descriptions of the unpublished Sanskrit Manuscripts.
II. Manuscript preservation techniques.
III. Descriptive catalogue of unpublished manuscripts.
IV. Description of unpublished manuscripts available in the manuscript libraries / repositories.
V. Introduction to unpublished manuscripts available in ancient Indian scripts.
VI. Publication of any unpublished manuscript.
VII. Textual criticism of an unpublished manuscript.
VIII. Evolution of Indian Scripts.
IX. Compilation of unpublished manuscripts based on a particular scripture.
X. Compilation of unpublished manuscripts based on a particular script, i.e. *śāradā, nevārī, ṭāṅkarī* etc.

1. Format of the Research Paper:

- All the fonts of Devanagari / Roman and Roman with diacritical marks, must be Unicode compatible. For Devanagari, Arial Unicode MS and for Roman, Times New Roman is preferable. The size of fonts should be 12 in case of English and 14 in case of Sanskrit / Hindi.
- Format of file must be Microsoft Word only. File Formats in Adobe Page Maker / pdf / Corel Draw / Adobe Indesign etc. are not acceptable.
- Page size must be of A4 typed on 1.15 line spacing and justified aligned and 1" margined format.
- Footnotes / References should be embedded in the text in a consistent style and order, as per American Psychological Association, 7th Edition (APA7) style:
- Arrangement of the pages of the paper should be made in the following format / order:
- Title page
- Abstract – in English in about 100 words
- Key Words
- Text
- References - (APA7) style
- Footnotes
- Tables
- Figures

- Appendices

2. The Title page setup should be made in the following format / order:
    - Paper title – Must be with English counterpart
    - Author name in both English and Devanagari fonts
    - Author's affiliation
    - Address to contact
    - Email id
    - Mobile Number
  - A passport size photograph in JPEG format only of 3.5 x 4.5 cm, up to 20 kb, must be attached along with the Research Paper.
  - Each Research paper should be accompanied with a scanned copy of the filled in declaration form available in our site.

All the research papers undergo a review process. The papers (without the name of the contributor) are sent to the reviewers having expertise on the field, and considered for publication only on the recommendations of the reviewers on following parameters:

1. The Research Paper must be an original contribution of the author.
2. The discussion should develop in the order from Statement of Problem to→ assumption or hypotheses to → critical evaluations → to a conclusion with the findings of research.
3. The Research Paper must present a discovery / invention of a new - idea / thought /design / plan / awareness / inkling/ indication / appreciation / conception / understanding / opinion / view/ concept / notion / theory / principle or even a new style of interpretation.
4. The language must be lucid and must meet the standard of presentation.
5. The Research Paper must have contemporary relevance, contributions to knowledge, clarity and logic in analysis, methodology and appropriateness of references.
6. f the author has quoted more than 500 words / a table / a figure from a published work, in the article, a copy of permission obtained from the respective copyright holder needs to be enclosed.
7. The copyright is transferred to the Journal if article is accepted for publication in "**प्राची प्रज्ञा**"/ Prachi Prajna, ISSN 2348 – 8417.
8. All the correspondence should be made through the same email ID only by which the paper has been submitted.
9. All the process will be made online only and no printing media will be undertaken.
10. The selection of the Research paper is entirely entrusted to "**प्राची प्रज्ञा**".

If the paper meets the preliminary requirements, the article will be processed for review, which could take up to 3 months. The accepted articles are scheduled for publication in the alphabetical order.

Check list of the enclosures along with the Research Paper:

1. **Original Research Paper in the prescribed format mentioned above.**
2. **A passport size photograph in JPEG format only of 3.5 x 4.5 cm up to 20 kb.**
3. **A Declaration by Author in the prescribed format**

(Editors, Śāstramañjūṣā)

"प्राची प्रज्ञा"

प्राची प्रज्ञा
E-Journal in Sanskrit

"प्राची प्रज्ञा" (ISSN 2348 – 8417)

The Peer Reviewed Refereed E-Journal in Sanskrit
Indexed in DOAJ

https://sites.google.com/site/praachiprajnaa

The śāstramañjūṣā
Peer Reviewed Research Papers on Indology
16th Issue / Vol. IX – June, 2023
https://sites.google.com/site/praachiprajnaa/sastramanjusa